## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

आर.एन.आई. सं.58951/94
ISSN 0975 - 0061

# आरण्यकम्

**अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्**

**(Bi-annual Refereed Sanskrit Research Journal)**

**संस्कृतप्रसारपरिषद्**
**आरा (विहारः)**

**पञ्चविंशं वर्षम्, द्वितीयोऽङ्कः**
**सितम्बर 2017**

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्


वर्षाङ्कौ - पञ्चविंशं वर्षम्, द्वितीयोऽङ्कः

**आश्विनः, वि.सं. २०७४**

**सितम्बर, २०१७**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - ५० रूप्यकाणि*
*संयुक्ताङ्कः - १०० रूप्यकाणि*

*वार्षिकं शुल्कं १०० रूप्यकाणि*



**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**



सम्पादकः
**प्रो. गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पेरिस् (फ्रान्स्)

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**
Email-sunilkumarp435@gmail.com



प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

अभिधानस्य त्रय: पन्थान:–उक्ति:, अनुक्ति:, द्विरुक्तिश्चेति। 'बालक: पठितवान्' इति कर्तु: उक्ति:, 'बालकेन पठितम्' इति कर्तु: अनुक्ति:, 'बालक: श्रावं श्रावं लिखति' इति द्विरुक्ति:। नात्र एक: पन्था:, एक एव पन्था इति वा। किं च नैते पन्थान: वैयाकरणप्रयोज्या:, अपितु लोकप्रयुक्ता:। पथामेतेषां विधिनियमादीनि केवलं शब्दशास्त्रेणोपदिष्टानि। तर्हि प्रश्नोऽयमुदेति–शास्त्रं प्रयोगसामान्यं प्रयोगविशेषं वाऽनुसृत्य तदनुशासनाय प्रवर्तते, उत शास्त्रं प्रयोगपथप्रदर्शकं भवति इति। अर्थात् प्रयोगप्रवाहस्य प्राधान्यं समधिकमुत शास्त्रनिर्दिष्टबुद्धिविलासस्य महत्त्वम् ? विषय एतस्मिन् महाभाष्यकारो ब्रूते– 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम:' इति। अत्र केवलं साधुशब्दप्रयोगे लोकवैशिष्ट्यं धर्मनियमपरिपालकतया शास्त्राणां महत्त्वं च प्रदर्शितमस्ति। किन्तु वाक्यप्रयोगकालेऽभिधानप्रकारा: किमर्थं भिन्ना भिन्ना भवन्ति, तत्र च कस्य प्रकारस्याधिकं न्यूनं वा महत्त्वम् इत्येतं विषयम् उपर्युक्त: पातञ्जलविमर्श: न व्याप्नोति। तर्हि लोकेऽभिधानवैविध्यस्य को हेतुरिति विषय: कश्चिद् विमर्शमपेक्षते।

वैविध्यमिदं काव्यप्रयोजनविमर्शकेनाचार्यमम्मटपादेन 'कान्तासम्मितयोपदेशयुजे' इत्यंशं व्याख्याय एवमुक्तम्– 'प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्य: सुहृत्संमितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यम्' इत्यादि। तत्र वेदादिशास्त्रेषु 'सत्यं वद, धर्मं चर' इत्याद्युक्तीनां वैशिष्ट्यात् तथा च शब्दपरिवृत्त्यसहत्वात् शब्दप्रधानताया: स्थिते: तेषु उक्ते: अभिधानस्य वा महत्त्वं द्रष्टुं शक्यते, तेषु वाक्येषु शब्दानाम् अभिधावृत्ते: आश्रयात्।

अर्थतात्पर्यवत्सु पुराणादीतिहासादिषु तथा च शब्दार्थयो: गुणभावेन विलक्षणार्थसिद्धे: प्रसङ्गे काव्यादौ सर्वथा अभिधावृत्तेरभावात् लक्षणाव्यञ्जनान्यतरवृत्तिस्वीकारात् तत्र उक्तेरपेक्षया अनुक्ते: वैशिष्ट्यं भूय: परिलक्षितुं शक्यते। तत्रैव सौन्दर्याभिलाषिभि: द्विरुक्तिद्वारा कापि चमत्कृति: साध्यतेऽपि।

अत: संसारे प्रयुज्यमानेषु उपर्युदाहृतेष्विव सामान्येषु वाक्येषु या उक्ति:



अनुक्तिरथवा द्विरुक्ति: परिलक्ष्यते, सा मूलत: शब्दस्य वृत्तिभेदकारणेन यथोक्तस्थलेषु वेदादिशास्त्र–पुराणेतिहास–काव्यादिप्रसङ्गेषु दृश्यमाना अस्ति। तत्प्रभावकारणेन सामान्यवाक्यप्रयोगकाले यदा अभिधयाऽर्थसिद्धि:, तदा उक्ति:, यदा च शब्दस्य महत्त्वापेक्षया अर्थस्य प्राधान्यं विविच्यते तत्र अनुक्ति: द्विरुक्तिर्वेति स्थिति: परिलक्षितुं शक्यते।

'आरण्यकम्' इदं सर्वासाम् उक्त्यनुक्तिद्विरुक्तीनां निरपेक्षतया शोधात्मकविमर्शमुद्दिश्य प्रवर्तमानमस्ति। डॉ. आदित्यनाथ झा अभिनन्दनग्रन्थ: (संस्कृतखण्ड:) 'संस्कृति:' इत्याख्य: १९६९ तमे वर्षे प्रकाशित आसीत्। तस्मात् विशिष्टलेखचतुष्टयं सौजन्यदृष्ट्या अङ्केऽस्मिन् स्वीकृतमस्ति। तदर्थं तद्ग्रन्थसंयोजनसमिते: कृते धन्यवादा: विज्ञाप्यन्ते।

गोपबन्धु मिश्र
सम्पादक:
आरण्यकस्य

## सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| **१. स्वात्मनः स्वरूपप्रतिष्ठा (काचित् कौलिकी दृष्टिः)** | महामहोपाध्याय डा.गोपीनाथ कविराजः<br>सौजन्यम् : 'संस्कृति'<br>डॉ. आदित्यनाथ झा अभिनन्दन ग्रन्थ<br>(संस्कृत-खण्डः), पृ.सं.४६-५० | १ |
| **२. स्वतन्त्रकलाशास्त्रे रसब्रह्मवादः** | डॉ. कान्तिचन्द्र पाण्डेयः<br>सौजन्यम् : 'संस्कृति'<br>डॉ. आदित्यनाथ झा अभिनन्दन ग्रन्थ<br>(संस्कृत-खण्डः), पृ.सं.५१-५८ | ७ |
| **३. प्रमाणेषु शब्दस्य स्थानम्** | पण्डित मुरलीधरपाण्डेयः<br>सौजन्यम् : 'संस्कृति'<br>डॉ. आदित्यनाथ झा अभिनन्दन ग्रन्थ<br>(संस्कृत-खण्डः), पृ.सं.१४५-१५४ | १५ |
| **४. लिङ्गविमर्शः** | पण्डितश्रीकृष्णशास्त्री मोकाटे<br>सौजन्यम् : 'संस्कृति'<br>डॉ. आदित्यनाथ झा अभिनन्दन ग्रन्थ<br>(संस्कृत-खण्डः), पृ.सं.२६३-२६७ | २५ |
| **५. भट्टनारायणीयनाटकस्य भाषिकी संरचना** | डॉ. धनञ्जय वासुदेव द्विवेदी<br>सहायक-प्राध्यापकः,<br>संस्कृतविभागः, राँची कालेज<br>राँची (झारखण्डः) - ८३४००८ | २९ |





| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| **६. अवसादचिकित्सायां योगस्य भूमिका** | डा. खगेन्द्र पात्र<br>६९८/७६६, श्रीनिकेतनम्<br>बालिआ, पत्रालयः- बालिआ<br>जिला - बालेश्वर (ओड़िशा) | ३७ |
| **७. महाभाष्यगतसामाजिकोदाहरणानां काशिकायां व्याप्तिवैशिष्ट्यम्** | प्रतिभा आर्या<br>शोधच्छात्रा<br>संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः, वाराणसी | ४५ |
| **८. किञ्चिद् रामायणीयम्** | वाल्मीकिरामायणम्<br>बालकाण्डम्-५ | ५० |


***

# स्वात्मनः स्वरूपप्रतिष्ठा
## ( काचित् कौलिकी दृष्टिः )

**महामहोपाध्याय डा. गोपीनाथ कविराजः***

अनादिप्रवृत्तया श्रीभगवतस्तिरोधानशक्त्या स्वात्मायं विगलितमहिमा पशुभावमापद्य 'जीव'नाम्ना प्रसिद्धिं गतः। आणवादिमलत्रयेण समावृतोऽयं मितप्रमाता कालचक्रे पतितः स्वकर्मवशात् संसरन् योनेर्योन्यन्तरं गच्छन् सुखदुःखे अनुभवति। देहपुर्यष्टक-प्राण-शून्यानि आत्मत्वेन मन्यमानोऽयं जाग्रदादिकां तां तामवस्थामनुभवति। अनुभूयमानः संसारोऽयं सुदीर्घविकल्परूपोऽविद्यासम्बन्धवशात् कालराज्ये सम्भवति। अज्ञानान्धस्य संसरणशीलस्यास्य समुद्धरणं कथं भवेद् इति शास्त्रेषु पक्षभेदानाश्रित्य विविधा विकल्पाः प्रदर्शिताः। स्वात्मस्वरूपविषयिणीं दृष्टिमुपाश्रित्य दर्शनानां विभिन्नाः सरणयः प्रसृताः। तत्रास्माभिः कौलिकीं काञ्चिद् दृष्टिमवष्टभ्य स्वात्मनः पशुत्वनिवृत्तिपूर्वकपूर्णत्वाधिगमविषये संक्षेपेण किञ्चिद् निवेद्यते।

कुलमते तावत् स्वात्मस्वरूपं परशिवात्मकं पूर्णाहन्तामयं स्वातन्त्र्यसारं च भूयोभूय उद्घोष्यते। अस्यैव समुद्धारप्रकारोऽत्रापेक्षितः। उद्धारकृत्यमिदं श्रीभगवतः परमानुग्रहसापेक्षम्। अकुलाख्यो निस्तरङ्गबोधसमुद्रः सद्गुरोः करुणाकटाक्षपातावसरे किञ्चिन्मात्रया तरङ्गितो भवति। तदानीं तस्मिन् बोधसमुद्रे स्पन्दरूपा काचिदूर्मिरुन्मिषति। गुरुकर्तृकप्रबोधनकाले शिष्यस्य चेतसि सा पतति। अयमेव व्यापारोऽनुग्रहनाम्ना शक्तिपातनाम्ना च विद्वत्सु प्रसिद्धः। जीवस्य दृष्टिरज्ञानप्रभावात् स्वभावतो विकल्पकलुषिता भवति। प्रागुक्तचिदूर्मिस्पृष्टा दृष्टिरियं पातमात्रेणैव स्वकार्यं साधयितुं प्रवर्तते। स्वकार्यं चास्याः ग्रास एव कालस्य, यत्प्रभावेण विकल्पानां प्रसरो भवति। कुलमतानुसारेण कालग्रासे सम्पद्यमाने जीवस्य दृष्टितो विकल्पजालं तिरोधातुमारभते। विकल्पतिरोधाने संवृत्ते जीवस्य प्रमेयगता शुद्धिः

*सौजन्यम् : 'संस्कृति' डॉ. आदित्यनाथ झा अभिनन्दन ग्रन्थ (संस्कृत-खण्डः),डॉ. आदित्यनाथ झा अभिनन्दनग्रन्थ संयोजन-समिति, नई दिल्ली, 1969, पृ.सं.46-50



संजायते। प्रमेयशुद्धिरियं जीवस्याध्यात्ममार्गे महतीं प्रगतिं सूचयति। इत्थं श्रीमता शङ्कराचार्येण प्रोक्तं विश्वं दर्पणदृश्यमाननगरीतुल्यमपि मायाप्रभावेण बाह्यवत् प्रतीयते। परन्तु श्रीगुरुकृपया मायायास्तिरोधाने सति तत् स्वात्मान्तर्गतमाभाति। इयमेव प्रक्रिया प्रमेयशुद्धिनाम्नाऽभिधीयते। अतो बहिः प्रतीयमानस्य विश्वस्यान्तरवभासनमेव प्रमेयशुद्धेस्तात्पर्यम्। अस्यां शुद्धौ सद्गुरोः कृपालेशेन सम्पन्नायां विश्वमन्तरेवाभासते, न तु बहिः। देहात्मबोधे विगलित एवं भवति। चिच्छक्तेः प्रबोधस्येदमेव महत् फलम्। तत्र सर्वादौ सा शक्तिर्विश्वमन्तराकर्षति। विश्वस्यान्तरानयनमेव बिन्दोर्व्यापारः, बहिः प्रसरस्तु वैसर्गिकी क्रिया।

अस्मिन् व्यापारे यादृशी संवित् प्रक्रिया क्रमशो भवति सा संक्षेपेण विविच्यते। अस्मिन् काले स्वात्मा देहात्मबुद्धिमुपाश्रित्य ग्राहको भूत्वा ग्रहणाख्यकरणेन बहिःस्थं ग्राह्यं गृह्णाति। अर्थात् इन्द्रियेण विषयं गृह्णाति तदा तस्य भोगः सम्पद्यते। विषयभोगद्वारा यदा संविदस्तृप्तिर्भवति तदा विषयभोगक्रिया निवर्तते। ज्ञानं पुनः रागात्मकं भवति, स्वात्मरूपेण साक्षात्कारोऽपि जायते। परा शक्तिः विषयभोगमपि निर्विकल्परूपेणैवानुभवति, न तु जीववत् सविकल्परूपेण। अयमनुभव एव चिद्देव्या द्वितीयो विकासः। इयमेव दशा कुलमार्गिणां वरिवस्या (उपासना) रूपेणोपवर्ण्यते। पशुभोगाद् व्यावृत्त ईदृशो भोगो वीराणामेव सम्भवति। पशुस्तावज् जाग्रदादिविषयान् परस्परं पृथक्तयानुभवति, वीरस्तु चिच्छक्तेरुन्मेषवशात् तुरीयानन्दरूपेण सममेव भुङ्क्ते। 'त्रितयभोक्ता वीरेशः' इति शिवसूत्रस्यैतदेव तात्पर्यम्। अस्मिन् विषये कस्यापि महतः पुरुषस्य वचनं स्मर्यते, तद्यथा–

**तत्तदिन्द्रियमुखेन सन्ततं युष्मदर्चनरसायनासवम्।**
**सर्वभावचषकेषु पूरितेष्वापिबन्नपि भवेयमुन्मदः॥**

एतादृशो भोग एव श्रीभगवतो विशिष्टार्चनतया विद्वद्भिः स्तूयते। सर्वे भावाश्चषकतुल्याः पूजारसस्वरूपं च आसवोपमम्। भावचषकेषु तेन रसेन पूरितेषु ज्ञानिनां भक्तानां च पानं भवति तद्गत उन्मादश्च।

वस्तुत एतद्दृष्ट्या चक्षुषा यद् रूपदर्शनम्, श्रोत्रेण यत् शब्दश्रवणं तत् सर्वमपि भगवदर्चनमेव। एवं सर्वैरपि इन्द्रियैः तत्तद्विषयग्रहणं भगवदर्चनमेव। ईदृशो विषयभोग एव वीरसाधकानामुपासनरूपेण परिगणितो भवति। जाग्रदादिष्ववस्थात्रयेषु सर्वदैव ईदृशी पूजा सम्भवति। दुर्बलचेतोभिः पामरजनैरेतादृशमर्चनं विधातुं न शक्यम्। अत्रापि भगवता श्रीशङ्करेण मानसपूजास्तोत्रे यदुक्तमासीत् तत् सर्वथा संगच्छते–

**यद् यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।** इति।

विषयभोगान्ते यदा तृप्तिः संजायते, तदा स्वत एव चित्तमन्तर्मुखं भवति। ततो हि विषयभोगक्रियायां समाप्तायां करणेश्वर्यस्तृप्ता भवन्ति। तदनन्तरं स्वत एव चिदाकाशरूपं भैरवाख्यं स्वनाथमालिङ्ग्य तेन सह तास्तादात्म्यरसमनुभवन्ति। यावत्कालमिन्द्रियाणां विषयभोगविषये निराकाङ्क्षत्वं नोत्पद्यते, तावत् तेषां चिदाकाशनाथेन आलिङ्गनं कदापि न सम्भवति। सर्वमिदं स्पष्टमेवानुभूयते।

इन्द्रियेभ्यो विषयभोगतृष्णायामनपगतायां श्वासोच्छ्वासक्रिया सर्वासु नाडीषु (72000) यथापूर्वं चलत्येव। तस्मिन् काले द्वादशान्तद्वये समागमो भवति। पवनस्यान्तर्गत्या अन्तर्द्वादशान्ते प्रवेशो लयश्च भवति, बहिर्गत्वा च बाह्यद्वादशान्ते प्रवेशो भवति लयश्च। द्वादशान्तद्वयमेव संघट्टस्थानम्। तत्रैव वायोः स्थिरता सम्भवति। तदेवमन्तर्बहिश्च वायुसंचारस्य विरतिर्भवति। इतः परं द्वादशान्तद्वयस्य सर्वथा सम्बन्धने जाते परप्रमातृभावः क्षणमात्रमुन्मीलति। प्रमाणप्रमेयसन्धिस्थानेऽप्येतदनुरूपमेव परप्रमातृदशानुभवनं संजायते। इयं परप्रमातृदेवी परासंविद्रूपैव, नात्र कश्चित् सन्देहः। उन्मिषिता सा देवी तदानीं मितप्रमातुः स्वरूपं स्वात्मतेजसा स्वस्वरूपे विलापयति।

एतत्प्रभावेणैकतः प्राणापानक्षोभः शाम्यति, अन्यतश्च मनसः संचारोऽपि सम्यग् रूपेण निवर्तते। इयं दशा यथा शान्ता,सर्वथा निर्विकल्पा चेति स्पष्टम्। अत्र चन्द्रसूर्ययोरुभयोरप्यस्तगमने सिद्धे स्थितिरियं प्रलीनशशिभास्कररूपस्य चिदाकाशस्य समरूपतायां पर्यवस्यति। तथा चेयं योगिनामाध्यात्मिकी 'शिवरात्रिः' इति वर्ण्यते।

एतां दशामतिक्रम्य कथञ्चिदुत्थान एकतः स्वरूपावरणमन्यतः स्वरूपोन्मीलनमुभयमपि संभाव्यते। अत्रैव परास्थितिमभीप्सूनां योगिजनानां महती परीक्षा संनिहिता भवति। अत्र मानमेयादिकं किमपि नास्ति, प्राणापानादिकमपि निवृत्तम्। यथा मनस्तदानीं शान्तम्, तथा प्राणादयोऽपि शान्ता एव। यथा ज्ञानज्ञेयभावस्याभावस्तथैव चलाचलभावस्यापि।

अत्र योगिभिर्निरन्तरं स्वरूपानुसन्धानं विधेयम्। शिवसूत्रेषु 'उद्यमो भैरवः' इति सूत्रेण तथैव निर्देशः कृतः। दशेयम् 'अनाख्या' नाम्ना योगिसम्प्रदायेषु प्रसिद्धा। स्वरूपोन्मीलनानन्तरं स्वरूपानुसन्धाने विद्यमाने, अत्र प्रवेशमात्रेणैव महाव्योमात्मकः स्वरूपविकासो जायते। चिदाकाशे स्थितिरियमेव। अनाख्यादशायां योगिनः स्वात्मबोधे स्थितिरावश्यकी। तदानीं स्वरूपावरणमपगच्छति निरावरणप्रकाशश्चाविर्भवति। अस्यां स्थितौ स्वात्मविमर्शस्य नितरामावश्यकत्वम्।



अत्र स्वात्मानुसन्धानं किमर्थमिष्यत इति चेद्, अनेनानुसन्धानेनैव शङ्कानिवृत्तिः सम्भवतीति ज्ञेयम्।

अस्यां स्थितौ विकल्पात्मकमखिलं जगद् अन्तर्मुखं भूत्वाऽन्तर्विलीयते। केवलमेतावन्मात्रमेव न भवति, क्रमशः परप्रमातृदशाऽपि समुन्मीलति। अस्मिन् समये चराचरस्य ग्रासो भवति। तदानीं स्वरूपस्मरणे विहिते महामाया निवर्तते। संसारचक्रं स्वात्माग्नावभेदज्ञाने परिणमते। इतः परं स्वरूपगोपनं निवृत्तं भवति। इयं स्थितिः 'भावसंहार'नाम्ना योगिषु प्रसिद्धा। 'उन्मना'नाम्नीयं दशा तन्त्रवित्सु प्रसिद्धा। अत्र निर्विकल्पकमात्मसंवेदनं विराजते। अत्र भावमयविश्वस्य निवृत्तिर्भवति। एतावत्पर्यन्तमूर्ध्वगतिर्यदा सम्पद्यते, तदा सम्यक् प्रमेयोच्छेदो घटते। अस्मिन् समये भेदज्ञानं तिरोभवति। हेयोपादेयबुद्धिरपि लीयते। इयं किल निर्विकल्पा स्थितिः शङ्काकल्पनादिपरिहीना।

एवं सत्यपीयं स्थितिः पूर्णाहन्ताकोटौ परिगणिता न भवति, संस्कारसत्त्वात्। संस्कारातिरोधान इदन्तालेशो वर्तत एव। एतादृश्यां स्थितौ 'मयेदमभेदेनावभासितम्' इत्याकारको विमर्शो योगिचेतसि प्रादुर्भवति। संहारावस्थायामपि संस्कारवशात् संहारस्य परामर्शः कथमप्यनुवर्तत एव।

इतः परं संस्कारोऽपि विनिवर्तते। तेन सह कालस्य कलनमपि। यावत् संस्कारोऽनुवर्तते, तावत् कालोऽपि कथञ्चिदनुवर्तते कलयति च। संस्कारनिवृत्तौ त्वहम्भावे कालकलितत्वाभावात् स्वाभाविकताऽऽविर्भवति। 'सर्वं खल्वहमेव' इति परामर्शोऽपि स्वात्मैकरूपेण शिवस्यैव पूजनम्। एतादृशीं पूजामधिकृत्य आचार्योत्पलेनाभिहितम्–

**तामगाधमविकल्पमद्वयं स्वस्वरूपमखिलार्थघस्मरम्।**
**आविशन्नहमुमेश सर्वदा पूजयेयमभिसंभवाय च॥**

भगवत्याः संविन्महादेव्या इतोऽपि परतः स्वात्मप्रकाशो विद्यते, यत्र विभिन्नरूपाणां विकासः तेषां स्वात्मस्वरूपे विलयनं च भवति। अयमपि संहारः। परन्तु अयं प्रागुक्तभावसंहाराद् गूढतरो विलक्षणश्च। भावसंहारस्तावत् प्रमेयसंहारः, अयन्तु प्रमाणसंहारः। कल्पान्ते प्रमेयसंहारो भवति। महाकल्पान्ते प्रमाणसंहारश्च। एषा स्थितिः महाकल्पसदृशी ज्ञेया। अस्यां स्थितौ प्रज्वलितचिदनले निखिलप्रमेयप्रमाणानां विलयो भवति।

अत्र द्वयी संहारभूमिः–एका प्रमेयगता, द्वितीया च प्रमाणगता। उभयत्रापि शङ्कोदयः सम्भवति। पूर्वस्यां भूमौ शङ्कानिवृत्तिः स्वप्रयत्नेन भवति। स्वप्रयत्नाभावे तु शङ्कानिवृत्तेरभावात् पतनं घटते। उत्तरस्यां भूमावपि शङ्कोदयः सम्भवतीति सत्यम्, परन्तु तत्र शङ्कानिवृत्तिः

स्वत एव संपद्यते। कर्तव्यादिविचार एवात्र शङ्कापदस्य तात्पर्यं ज्ञेयम्। एतावति सिद्धेऽपि प्रमेयाणां जीवनी शक्तिर्द्वादशेन्द्रियरूपेण तिष्ठत्येव। द्वादशेन्द्रियात्मकः सूर्योऽहङ्काररूपे परमादित्ये लीनो भवति। अहङ्कारोऽयं प्रमातृरूपो ज्ञेयः। अस्यैव नामान्तरं 'भर्गशिख'इति।

परस्याः संविदोऽष्टाभी रूपैः शब्दादिविषयरसाः स्वात्मस्वरूपे विलीना भवन्ति। एतावत्पर्यन्तं निखिलकलानामुपसंहारो भवति, एकाममृतां कलां विहाय। अमारूपेयं परमा कला शिवकला पराप्रमातृरूपेति ज्ञेयम्।

परमादित्योऽयं मितप्रमातैवेति स्मरणीयम्। यद्यप्येतदनन्तरं मितप्रमातुरुत्कर्षो भवति कालाग्निरुद्ररूपेण, तथाप्ययमपि प्रमाता मित एव। अतः पशुत्वं किञ्चिन्मात्रयाऽत्रापि विद्यत एव। अस्यां स्थितौ विषयाणामिन्द्रियाणां च संस्कारलेशोऽपि नावशिष्यते। अत्र यत् तत्त्वमवशिष्यते तत् तु विकल्पहीनमतीन्द्रियं प्रकाशरूपमिति ज्ञेयम्।

रुद्रदशायाः समाप्तौ भैरवदशा समुदेति। भैरवोऽयं महाकालरूपो यत्र परासंविदो महाकालीरूपं शक्तिरूपेण विजृम्भते।

महाकालः खलु पञ्चकृत्यकारीति सत्यम्, परन्तु निरपेक्षतया स किमपि कृत्यं न करोति। स्वयं भगवत्या जगदम्बाया नियोगादेव स सर्वं कृत्यं करोति, स्वातन्त्र्याभावात्।

अत्र महति तेजसि यावत्यो मिताहन्ता दग्धा भवन्ति, एका पूर्णाहन्तैवाक्षुण्णा तिष्ठति। मिताहन्तास्ताद् देहाहन्ता, प्राणाहन्ता, पुर्यष्टकाहन्ता, शून्याहन्तादिरूपाः। एतासां दाहान्ते केवला विश्वाभेदमयी पूर्णाहन्तैव विराजते।

अत्रैव योगी परमशिववद् भवति, परन्तु व्यापिनीकलया पञ्चकृत्यानि करोति। इतः परं महाभैरवदशा समायाति। स्थितिरियं महाकालस्याप्यूर्ध्ववर्त्तिनीति ज्ञेयम्। अत्र सर्वे संस्काराः शान्ताः। अत्रैव स्वात्मसंवेदनं परां कोटिमवाप्नोति। अत्र महाकाल्यप्यकुले प्रवेशोन्मुखी भवति। अत एवेयं दशा 'अकाल-कलिता' इति भण्यते। योगिनोऽत्र समानभूमौ प्रवेशो जायते। अत्र सृष्टिसंहारात्मकः कालो न विद्यते, साम्याख्यः कालस्तु विद्यत एव। कालोऽत्राकालवद् यत्रानन्तकालोऽपि क्षणरूपेणैव प्रतीयते।

**न सदा न तदा न चैकदेत्यपि सा यत्र न कालधीर्भवेत्।**
**तदिदं भवदीयदर्शनं न च नित्या न कथ्यतेऽन्यथा॥**

इतः परं या अन्तिमा दशा सैव क्रमविकासस्योत्तरावधिर्भवति। स्थितिरियं परमशिवदशेत्यागमविद्भिः ख्यायते। अत्रैव स्वात्मस्वरूपं परिपूर्णमहिम्ना परमार्थरूपेण भ्राजते। अत्रैव च परस्याः संविदः स्वरूपं साक्षात् क्रियते। देवीयं युगपदेव पूर्णा च



कृशा च युगपदेवोभयरूपा चानुभयरूपाऽपि। इयं समस्तपदानां (प्रमेयादीनां) समस्तचक्राणां च (सृष्ट्यादीनां) विकासरूपा,अतएव पूर्णा। यदा पुनः सा पदानि चक्राणि च स्वात्मस्वरूपे लीनानि करोति, तदा सा कृशा। तदानीमेव सा 'कालसंकर्षिणी' इति नाम्ना ख्यायते। अस्यां परमस्थितौ क्रमो न विद्यते, न च यौगपद्यमपि। क्रमेण सहाक्रमस्य कोऽपि सम्बन्धो नास्ति। क्रमविधाने देव्याः क्रमविकासो जायते। अस्य विकासस्य प्रभावेण प्रमेयादयः क्रमशः स्वात्मसंवित्तिरूपेण भासन्ते। इदमेव परमं पदम्, यतः परतरं किमपि नास्ति। अत्रैव स्वात्मनः स्वरूपप्रतिष्ठा।

***

# स्वतन्त्रकलाशास्त्रे रसब्रह्मवादः

**डॉ. कान्तिचन्द्र पाण्डेयः***

अस्मिन् स्वल्पे लेखे रसब्रह्मवादस्य दिग्दर्शनमात्रं कर्तुं शक्यते। अतोऽस्य विषयस्य अंशचतुष्टयमात्रं संक्षेपेण व्याख्यास्यते।

1. पाश्चात्त्येषु ईस्थेटिक्स इति नाम्ना प्रसिद्धो विषयः न साहित्यिकसमालोचनामात्रम्, न सौन्दर्यदर्शनमात्रम्, नापि रसवादमात्रम्।
2. एतद्विषयविषयिणीनां पाश्चात्यविचारधाराणां भारतीयाभिस्तुलना।
3. स्वतन्त्रकलाशास्त्रशब्दार्थविवरणम्।
4. काव्यकलाजन्योऽनुभवः।

**ईस्थेटिक्स-शब्दार्थविवेचनम्**

'ईस्थेटिक्स' इति नाम्ना पाश्चात्त्येषु प्रसिद्धाद् विषयात् साहित्यिकसमालोचनेति सौन्दर्यदर्शनमिति रसवाद इति वा भारते विश्रुतस्य विषयस्य को भेद इति प्रथमं स्पष्टीकार्यम्। यत इमे शब्दा एकार्था इति बहूनां भ्रमः। सत्यं त्विदं यत्पाश्चात्त्येष्वपि ईस्थेटिक्स-लक्षणविषये मतभेदः। केचन सौन्दर्यदर्शनमिति लक्षयन्ति। तत्रापि सौन्दर्य-विषये मतभेदः। केचन प्रकृतिगतं कलागतं च सौन्दर्यं लक्ष्यतया स्वीकुर्वन्ति। अपरे तु कलागतमेव सौन्दर्यं लक्ष्यमिति मन्वते। एवञ्च सौन्दर्यशब्दार्थविषयेऽपि मतभेदः। केचनेन्द्रिय-सुखदं सुन्दरम् इति मतमवलम्बन्ते। अपरे मनस आत्मनो वा सन्तोषप्रदं आनन्दजनकं वा सुन्दरमिति मतमुपस्थापयन्ति। कलागतसौन्दर्यमेव लक्ष्यमिति मन्वानेष्वपि मतभेदः। केचन सर्वाः कलाः लक्ष्याः, अपरे तु उपयोगिकलानां स्वतन्त्रकलाभ्यो भेदं व्यवस्थापयन्तः

*सौजन्यम् : 'संस्कृति' डॉ. आदित्यनाथ झा अभिनन्दन ग्रन्थ (संस्कृत-खण्डः),डॉ. आदित्यनाथ झा अभिनन्दनग्रन्थ संयोजन-समिति, नई दिल्ली, 1969, पृ.सं.51-58



स्वतन्त्रा एव कलाः लक्ष्या न तूपयोगिन्य इति सिद्धान्तं स्थापयन्ति। इदं दर्शनमात्रमित्यपि मतं बहव आधुनिकाः पाश्चात्त्या न स्वीकुर्वन्ति। विज्ञानप्रधानेऽस्मिन् युगे विज्ञानदृष्टिकोणादिमं विषयम् अधीयानाः इदं विज्ञानस्येका शाखेत्यूरीकुर्वन्ति।

**एतद्विषयविषयिणीनां पाश्चात्त्यविचारधाराणां भारतीयाभिस्तुलना**

जर्मनदेशीयेनैकेन विद्यार्थिना वोंगाटननाम्ना डाक्टरोपाधिप्राप्त्यर्थं लिखिताय स्वपुस्तकाय 'ईस्थेटिका' इति नाम प्रदत्तम्। अयं शब्दः ग्रीक्-भाषायाः 'ईस्थेटिक्स'-इति शब्दस्यापभ्रंश-रूपः। तस्मिन् पुस्तके प्रयुक्तस्य ईस्थेटिकइत्यस्य लक्षणं ददता तेनोक्तम्-''इदम् ऐन्द्रियक-निर्विकल्प-प्रत्यक्षस्य विज्ञानम्'' इति। स्वविचारञ्च स्पष्टीकुर्वता तेन निगदितम् इदं विषयेन्द्रिय-सन्निकर्षजन्यानां तासां वेदनानां विज्ञानम्, या भाषायां संपूर्णतया प्रकटयितुं नैव शक्यन्ते। 'ईस्थेटिक' इति शब्दे एतच्छब्दाभिधेयस्य विज्ञानत्वद्योतकं सकारं संयोज्याऽधुना ''ईस्थेटिक्स' इति शब्दैः प्रयुज्यते।

वोंगाटनमहोदयानाम् अध्ययनं साहित्याश्रितमासीत्। तैः साहित्यश्रवणजन्याया वेदनाया अनुभवस्य वा मनोविज्ञानिकं विश्लेषणं कर्तुं प्रयत्तम्। एतत् कुर्वता तेनेदमुपलब्धं यदियं वेदनाऽयं वाऽनुभवः सांसारिकेभ्योऽनुभवेभ्यो विलक्षणः। न च साधारणलोकप्रचलित-भाषायामस्य संपूर्णतया प्रकटनं शक्यम्। इत्थं महता प्रयासेन तैस्तदेवोपलब्धं यदस्माकं साहित्यविद्भिः ध्वनिसिद्धान्तस्थापकस्यानन्दवर्धनाचार्यस्य समयात् स्वीक्रियते। यथाहुः-

**उक्त्यान्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन्।**
**शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयो भवेत्॥** इति।

जर्मनदेशीयाः सुविख्याता दार्शनिकाः काण्ट-इतिनाम्ना प्रसिद्धा एतस्य विषयस्योपरि स्वीयदार्शनिकदृष्ट्या लिखन्तः '**क्रिटीक आफ जजमेण्ट**' इति नाम्नि पुस्तके ''ईस्थेटिक्स' एकं दर्शनमिति मतं प्रकटयन्ति स्म। इन्द्रियसुखदवस्तुनः सौन्दर्यानुभवजनकाद् वस्तुनो भेदं स्थापयन्ति स्म। सौन्दर्यानुभवं कालाद्यनवच्छिन्नं मन्वते स्म। सौन्दर्यानुभवं कालाद्यनवच्छिन्नं प्रतिपादयद्भिस्तैः तदैव पाश्चात्त्येषु प्रकटीकृतं यद् भारतेऽभिनवगुप्तपादैः बहुकालपूर्वं संस्थपितमासीत् काव्यनाट्यजनितानुभवविषये।

अनन्तरं जर्मनदेशीयेन अतीवप्रभावशालिना दार्शनिकेन हेगल महाभागेन स्वीये '**फिलासफी आफ फाइन आर्ट्स**' इति नाम्नि त्रिभागे महति ग्रन्थे उपयोगिनीनां कलानां सुन्दरकलानां च पारस्परिको विभागः कृतः। काव्य-संगीत-वास्तु-मूर्ति-चित्रकलाः सुन्दरकलाः, एतद्भिन्नाश्च उपयोगिन्यः कला इति उद्घोषितम्। कलानुभवे विषय-विषयिणावुभावपि व्यक्तित्वविधायकांशैर्देशकालादिभिः शून्यौ भवतः, कलाकृतिश्च कलाकारे

एकां प्रकृतिदत्तां 'जिनियस' इत्यभिधेयां विलक्षणशक्तिमपेक्षते। कलानुभवितरि चापरा प्रकृतिदत्ता विलक्षणा शक्तिः 'टेस्ट' इति नाम्नी परमावश्यकीत्यादि सविस्तरं प्रतिपादितम्। इदं सर्वं दशमशताब्द्यामभिनवगुप्तपादैर्भरतकृतस्य नाट्यशास्त्रस्योपर्यभिनवभारतीनाम्नीं टीकां लिखद्भिः सुस्पष्टीकृतमासीदिति तु साहित्यविदो भवन्तो जानन्त्येव।

तथा हि यदिदं साहित्यकलानुभवस्य कालाद्यनविच्छिन्नत्वप्रतिपादनं यच्च विषयविषयिणोरुभयोरपि व्यक्तित्वविधायकांशराहित्यस्वीकरणं तद् भारतीयैः प्रतिपादितस्य साधारणीभावस्य प्रतिध्वनिमात्रम्। काश्मीरिको वेदान्तमतानुसारी भट्टनायको हि प्रथमं रसानुभवे विषयविषयिणोरुभयोरपि साधारणीभावो भवति, स च भावकत्व-भोजकत्वनाम्नीभ्यां काव्यभाषाशक्तिभ्यां जन्यत इति मतमुपस्थापयति स्म। तदनन्तरं काश्मीरिकशैवाद्वैतप्रतिपादको महामाहेश्वरोऽभि-नवगुप्तपादाचार्यः शैवाद्वैतस्य आभासवादप्रक्रियाऽनुसारेण प्रेक्ष्यप्रेक्षकयोः काव्य-तद्रसयितोश्च साधारणीभावो भवतीति स्पष्टीकृत्य भावकत्व-भोजकत्वनाम्न्यौ भट्टनायकाभ्युपगते शक्ती अनावश्यके इत्युद्घोषितवान्।

यत्किञ्चित् 'जिनियस' इतिनाम्ना पाश्चात्त्येषु प्रसिद्धं तत्सर्वम् अभिनवगुप्तस्वीकृत-प्रतिभाख्यकविशक्त्यन्तर्गतमेव। यथाह लोचने–

प्रतिभाऽपूर्ववस्तुनिर्माणक्षमा प्रज्ञा, तस्या विशेषो वैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वम् इत्यादि।

प्रतिभायाः भर्तृहरि-भट्टतोत-राजशेखरादिदृष्टिकोणेभ्यो विशिष्टं प्रतिपादनं मयाऽभिनवगुप्त इतिनामकस्य स्वीयपुस्तकस्य द्वितीयसंस्करणे कृतमिति नेहाधिकमुच्यते।

यच्च किंचित् 'टेस्ट' इति शब्देन पाश्चात्त्यैरुच्यते तदपि सर्वम् अभिनवगुप्तलक्षित-सहृदयतान्तर्गतमेव। यथाह लोचने परात्रिंशिकाविवृतौ च–

येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते हृदयसंवादभाजः सहृदयाः। यथोक्तम्–

**योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः।**
**शरीरं व्याप्यते तेन शुष्कं काष्ठमिवाग्निना।।** इति।

परात्रिंशिकाविवृतौ तु मनोवैज्ञानिकदृष्ट्या समधिकं विशदीकृतं सहृदयतायाः स्वरूपम्। यथाह–

एकेनैव च रूपाद्यन्यतमेन उद्रिक्तप्राक्तनबलोपबृंहितस्य सर्वविषयकरणीयोक्तक्षोभकरण-समर्थत्वम्।........तथा च तद्वीर्यानुपबृंहितानाम् अविद्यमानतया विविधवीर्यविक्षोभात्मक-



मदनानन्दानां पाषाणानामिव रमणीयतरतरुणीरूपमपि नितम्बिनीवदनघूर्णमानकाकली-कलगीतमपि न पूर्णानन्दपर्यवसायि। यथा यथा च न बृंहकं भवति तथा तथा परिमितचमत्कारपर्यवसानम्। सर्वतो ह्यचमत्कारे जडतैव। अधिकचमत्कारावेश एव वीर्यक्षोभात्मा सहृदयतोच्यते।

अद्यत्वे तु योरोपीयदेशेष्वमेरिकादेशेषु च ईसापूर्व-पञ्चमशतकादारभ्य ईसवीयविंशति-शताब्दपर्यन्तं यत्किञ्चित्तद्देशीयैर्विभिन्नकलागतसौन्दर्यविषये प्राकृतिकसौन्दर्यविषये च सॉफिस्ट-गार्जियस-सॉक्रेटीस-प्लेटो-अरिस्टॉटल-प्लोटाइनस-लाक-वार्क्ले-ह्यूमांडेकार्ट-काँट-हेगल-शोपनआवर-क्रोचे इत्यादिभिर्लिखितं तत् सर्वम् ईस्थेटिक्स-इतिहास-लेखकैः ईस्थेटिक्स-इतिहासपुस्तकेषु संगृह्यते।

मेक्समूलरादीनाम् इदं मतं पठित्वा यद् भारतीया एतद्विषये किमपि न जानन्ति मन्मनसीदमायातं यत् संस्कृतपुस्तकान्यधीत्य विभिन्नकलाविषयिण्यो भारतीयविचारधारास्तथा संकलनीयाः, आङ्गलभाषायां भारतीय-विदेशीयविचारधारयोः साम्यं तथा करणीयं येनायं वैदेशिकानां भ्रमो दूरीभवेत्। इदं च तैः समवगतं स्याद् यत् पाश्चात्त्यदेशेषु काचन सौन्दर्यविषयिणी विचारधारा नास्ति या भारते न प्रवहति स्म।

## स्वतन्त्रकलाशास्त्र-शब्दार्थविवरणम्

'ईस्थेटिक्स' इति शब्दार्थे मया स्वतन्त्रकलाशास्त्रम्-इति शब्दः प्रयुज्यते। एवं कुर्वतो ममायमाशयः। शास्त्रम् इति शब्द एतदर्थे प्रयुज्यते येनेदं प्रकटीकृतं स्यात्, यत् कलाविषयः भारते न केवलं दार्शनिकदृशाऽधीतः, अपितु वैज्ञानिकदृष्ट्यापि। यतो हि शास्त्रशब्दो दर्शनविज्ञानसाधारणः, अस्य शिक्षणोपायार्थत्वात्। संस्कृतवाङ्मये द्व्यशीत्यधिकाः पञ्चशतकलाः परिगणिताः। अतो भारते विदितानां कलानां संख्या चतुःषष्टिरेवेति न भ्रमितव्यम्। वात्स्यायनात् पूर्वभावी बाभ्रव्यः पाञ्चालः कलानां सर्वतः प्रथमं मूलकलास्वन्तरकलासु च विभागं कृतवान्। तन्मतानुसारेण मूलकलाश्चतुःषष्टिसंख्याकाः। अन्तरकलानां संख्या त्वष्टादशाधिकं पञ्चशतम्। यथाह–'आस्वेवान्तरनिविष्टानामन्तरकला-नामष्टादशाधिकानि पञ्चशतान्युक्तानि' इति का.सू.32। ताश्च कला अन्यैर्द्विविधाः स्वीकृताः उपयोगिन्यः स्वतन्त्राश्च। उपयोगिन्यः कलास्ता यास्तानि वस्तून्युत्पादयन्ति, यानि सांसारिकजनानां सुखं वर्धयन्ति। यथा वस्त्रनिर्माणाद्याः कलाः। स्वतन्त्रास्तु ताः कलाः, याः परं तत्त्वं परं ब्रह्म वा तादृशेनेन्द्रियग्राह्यरूपेण प्रेक्षकस्य पुर उपस्थापयन्ति यादृशेन सहृदये प्रेक्षके परब्रह्मास्वादसविधः, तद्रूपो वानुभव उद्भाव्यते। एवंविधाः कलास्तिस्रः काव्यकला, संगीतकला, वास्तुकला च। यतः भारतीयैः शास्त्रकारैरेतासु तिसृष्वेव कलासु

परब्रह्मास्वादजनककृत्युत्पादनशक्तिः स्वीकृता, नेतरासु। एवं च, स्वतन्त्रकलाशास्त्रं तच्छास्त्रं यस्य विषयः स्वतन्त्रकलानां दर्शनं विज्ञानं च।

स्वतन्त्रकलानां विज्ञानम् अस्य शास्त्रस्य विषयः यतो भारते इमाः कला विषयरूपेण पर्यालोच्यन्ते। एकस्याः कलाकृतेर्विषयरूपेण पर्यालोचने तस्या विभिन्नांशेषु विश्लेषणं क्रियते, तेषां पारस्परिको भेदः प्रदर्श्यते, तेषां पारस्परिकः संबन्धो निर्धार्यते। स्वतन्त्रकला-वैज्ञानिको न केवलं कलाकृत्युत्पादनार्थमुपयुक्तानि विभिन्नसमवायिकारणानि आश्रित्य कलाः परस्परतो भिन्नतया गणयति, अपित्वेकस्याः कलायाः बह्वीः कृतीः पर्यालोच्य तासां पर्यालोचितवैलक्षण्यानुसारेण ताः विभिन्नवर्गेषु वर्गीकरोति।

अपरञ्च, स्वतन्त्रकलाशास्त्रं स्वतन्त्रकलाविज्ञानम्। यत इदं स्वतन्त्रकलोद्भावितमनुभवं मनोवैज्ञानिकरीत्या विश्लेषयत्यधोलिखितेषु विभिन्नांशेषु।

(अ) प्रतिभावतः कलाकर्तुः सहृदयस्य प्रेक्षकस्य वा व्यक्तित्वं विश्लेषयत् प्रदर्शयति कलाकर्तुः प्रेक्षकस्य वा व्यक्तेः साधारणलौकिकव्यक्तेः कानि वैलक्ष्याणि।

(आ) कलानुभवस्य विभिन्नेषु स्तरेषु इन्द्रियबोधस्वतन्त्रोल्लेख-स्वात्मविस्मृतिसाधा-रणीभावादिषु प्रतिभा-सहृदयत्वादीनां सहयोगेनाऽनुभवविषयस्य मानसी मूर्तिः कथं संवर्धत इति स्पष्टीकरोति।

(इ) न्यायदिशा कलानुभवस्य सत्य-मिथ्या-संशय-प्रत्यभिज्ञादिरूपेभ्योऽनुभवेभ्यः वैलक्षण्यं साधयति।

(ई) इन्द्रियसुखजननोपदेशप्रदानालौकिकानुभवोत्पादनादिरूपान् कलाकृत्युद्देश्यान् विवेचयति।

(उ) सकारणोपन्यासमिदं हृदयङ्गमीकरोति यत् कलाकृतिर्नानुकरणं नेन्द्रजालं न च भ्रामकं वस्तु।

(ऊ) साहित्यकलाप्रसङ्गे व्यञ्जनाशक्तिम् अभिधा-लक्षणा-तात्पर्यशक्तिभ्यो भिन्नां व्यवस्थापयति मनोवैज्ञानिकरीत्या।

(ऋ) नाटकं चाक्षयं प्रकृतिकार्यावस्थादिगतचतुःषष्ट्यङ्गेषु विश्लेषयति, वर्गीकरोति च नायकादीन् तेषां भाविक-चारित्रिकादिवैलक्षण्यानुसारेण। एभिः कारणैः स्वतन्त्रकलाशास्त्रं विज्ञानम्।

परं स्वतन्त्रकलाशास्त्रं दर्शनमपि। यत इदं कलाजनितमनुभवं दार्शनिकरीत्या विवृणोति। यतश्च तिसृणां साहित्यसंगीतवास्त्वभिधानां कलानां शास्त्रकारा इदं मतमवलम्बन्ते



यत् कलाकृतयस्तदभ्युपगतं ब्रह्म प्रदर्शयन्ति। तथा च त्रयः कलासिद्धान्ताः भारते विश्रुताः–

रसब्रह्मबादः, नादब्रह्मवादः, वास्तुब्रह्मवादश्च।

तत्र रसब्रह्मवाद उपनिषत्समयेऽपि प्रचलित आसीत्, यथा स्पष्टीभवति ‘रसो वैः सः’ इत्याद्युपनिषद्वाक्येभ्यः। नादब्रह्मवादो वैयाकरणस्फोटवादप्रभावितेन शार्ङ्गदेवेन स्वीय-संगीतरत्नाकरे सुप्रतिपादितः। भोजेन स्वीयसमराङ्गणसूत्रधारे वास्तुब्रह्मवादः स्थापितः– ‘**वास्तुब्रह्म सदा विश्वं व्याप्नोति सकलं जगत्**’ इत्यादि वदता। इत्थं स्वतन्त्रकलाशास्त्रं दर्शनमपि। एतावद् मया इमां भ्रान्तिं दूरीकर्तुमुक्तं यत् साहित्यिकसमालोचनामात्रं सौन्दर्य-दर्शनमात्रं वा ‘ईस्थेटिक्स’ पदवाच्यम्।

वैज्ञानिक-साहित्यिक-समालोचनाविषये वक्तव्यमिदम्–वैज्ञानिकदृष्ट्या संस्कृतसाहित्य-ग्रन्थानां विश्लेषणं कुर्वद्भिः सप्तसाहित्यिकतत्त्वानि लक्षणाऽलङ्कारगुणदोषरीतिध्वनिरसरूपा-ण्युपलब्धानि। लक्षणालङ्कारयोर्भेदो भरतेन स्वीकृतः। तेन चत्वार एवालङ्काराः स्वीकृताः। लक्षणानि तु षट्त्रिंशत्। लक्षणालङ्कारगुणवृत्तीनां न मौलिको भेदः। अध्येतृसौकर्यार्थमेवायं विभागः कृतः। अलङ्कारगुणादयः कविप्रतिभोत्थापितस्याऽलौकिक-मानसचित्रस्य भाषायां चित्रणस्योपायाः।

**दोषाणां काव्यतत्त्वेषु गणनम् असंगतम्**– इत्याक्षेपस्य समाधानमभिनव-गुप्तपादैरेवं कृतम्–

**न वै दोषा दोषा न च खलु गुणा एव च गुणा**
**निबद्धः स्वातन्त्र्यं सपदि गुणदोषान् विभजते।**
**इयं सा वैदग्धी प्रकृतिमधुरा तस्य सुकवेर्**
**यदत्रोत्पादादप्यतिसुभगभावः परिणतः॥**

इदं पद्यम् अभिनवगुप्तपादैः स्वीयात् पुरोरवविचारात् स्वीयायां घटकर्परकुलकनामकस्य कालिदासीयकाव्यस्य टीकायाम् उद्धृतम्। साहित्यिकसमालोचनाया आदर्शोऽभिनवगुप्त-पादानां घटकर्परकुलकटीकायाम् उपलभ्यते।

### काव्यकलाजन्योऽनुभवः

दार्शनिकदृष्ट्या काव्यनाटकोद्भावितमनुभवं विवेचयद्भिर्विभिन्नैर्भरतकृतनाट्यशास्त्रटीका-कारैर्विभिन्नानि मतान्युपस्थापितानि। श्रीशङ्कुको रसानुभूतिरनुमितिजन्येति प्राच्यन्यायानुसारेण प्रत्यपादयत्। एतन्मते विभावानुभावव्यभिचारिभ्योऽनुमितः स्थाय्येव रसः। तदनन्तरभावी कश्चन भ्रान्तिरियमित्युदघोषयत्। वेदान्तानुसारी भट्टनायकः काव्यभाषाया भावकत्व-

भोजकत्वनाम्न्यौ द्वे स्वतन्त्रे वाद्यन्तरानभ्युपगते शक्ती अभ्युपगत्य प्रेक्ष्यप्रेक्षकयोः साधारणीभावजन्येयमिति मनुते स्म। एतन्नये रसास्वादो ब्रह्माऽऽस्वादसहोदरः। सहोदरता चास्मिन्नंशे। जीवब्रह्मणोर्वास्तविकमैक्यम्। भेदस्तु मायीयावच्छेदककृतः। साधारणीभावे संजाते मायीयावच्छेदकभ्रंशाद् जीवो ब्रह्मैव भवति, तथापि ब्रह्मण इयान् भेदस्तिष्ठत्येव यद्रसास्वादकाले उद्बुद्धः साधारणीकृतः स्थायी जीवात्मानमुपरञ्जयत्येव।

अभिनवगुप्तस्तु काश्मीरिकाद्वैतशैवदृशा रससिद्धान्तं स्थापयन्नद्वैतशैवप्रक्रियया प्रेक्ष्यप्रेक्षकयोः साधारणीभावो भवतीति प्रदर्शयन्, भावकत्व-भोजकत्वशक्त्यभ्युपगमो व्यर्थ इति सिद्धान्तयन्, रसानुभवे स्तरत्रयमूरीकरोति। तन्मतानुसारेण प्रथमे स्तरे प्रस्तावना-गतगीताऽऽतोद्यचर्वणाविस्मृतसांसारिकभावतया विमलमुकुरकल्पीभूतनिजहृदयः प्रतिभाशाली सहृदयो दृश्यदर्शनध्वनियुक्तश्रव्यश्रवणानन्तरं स्वप्रतिभया कविमनोगतचित्रसदृशं विभावानु-भावव्यभिचारिणां देशकालव्यक्तिविशेषसम्बन्धशून्यं चित्रं स्वान्तःकरणे चित्रयति। वासनारूपेण स्थितस्य विभावादिसमुचितस्य स्थायिभावस्य जागरणात् तेन च सह विभावानु-भावव्यभिचारिभावानां पानकरसन्यायेन संमिश्रणादभिव्यक्तं रसमनुभवति च।

द्वितीये स्तरे सहृदयचेतसश्चर्व्यमाणरससारग्रहणपरत्वाद् अपहसितविभावादिः स्थाय्येव चर्वणापात्रम्। यतोऽप्रधाने वस्तुनि च कस्यचित् संविद् विश्राम्यति, अप्रधानवस्तुप्रत्ययस्य प्रधानान्तरं प्रत्यनुधावतः स्वात्मन्यवविश्रान्तत्वात्। अतो विभावानुभाववर्गे स्थायिना संमिश्रितेऽपि स्थाय्येव चर्व्यते। यथाह अभिनवगुप्ताचार्यः–

**ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः,**
**पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।**
**दर्भैरर्धावलीढैः श्रमविततमुखभ्रंशिभिः कीर्णवर्त्मा,**
**पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥**

इत्यादिवाक्येभ्यो वाक्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिकाऽपहसिततत्तद्वाक्यो-पात्तकालादिविभागा तावत्प्रतीतिरुपजायते। तस्यां च 'यो मृगपोतकादिर्भाति तस्य विशेषरूपत्वाभावाद् भीत इति त्रासकस्यापारमार्थिकत्वाद् भयमेव, परं देशकालाद्यनालिङ्गितम्। तत एव 'भीतोऽहं भीतोऽयं शत्रुर्वयस्यो मध्यस्थो वा' इत्यादिप्रत्ययेभ्यो दुःखसुखादिकृत-हानादिबुद्ध्यन्तरोदयनियमवत्तया विघ्नबहुलेभ्यो विलक्षणं निर्विघ्नप्रतीतिग्राह्यं साक्षादिव हृदये निविशमानं चक्षुषोरिव विपरिवर्तमानं भयानको रसः।

(अ.भा., भा. 1 पु. 280)

तृतीये तु स्तरे विषयविषयिरूपं द्वैतं सर्वथा व्यपगच्छति, संविदः पूर्णतयाऽन्तर्मुखी-



भूतत्वाद् विषयतयाऽवभासमानस्योद्बुद्धस्य स्थायिनोऽपि वासनायां प्रतिमज्जनात्। एवं चाभिनवगुप्तमते तृतीयस्तरे रसानुभवः परमानन्दानुभवो व्यतिरेकतुरीयातीतसमाधावनुभूय-मानादनुभवादभिन्नः, सर्वस्यापि वैषयिकज्ञानस्य वासनायां निमग्नत्वाच्छुद्धस्य संविदात्मन आनन्दरूपे स्वस्वरूपे भानाच्च। यथाह प्रत्यभिज्ञाविवृतिविमर्शिन्याम्–

''मधुरादिरसास्वादे तु विषयस्पर्शव्यवधानम्, ततोऽपि काव्यनाटकादौ तद्व्यवधान-शून्यता, तद्व्यवधानसंस्कारानुवेधस्तु तत्रापि। परन्तु तथोचितव्यवधानांशतिरस्क्रियासावधान हृदया लभन्त एव परमानन्दम्'' इति।

तथा चाभिनवभारत्याम्– 'अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखाशङ्का' इति।

इत्थम् अभिनवगुप्तप्रतिपादितरसब्रह्मवादानुसारेण रसास्वादोऽन्तिमस्तरे न ब्रह्मास्वाद-सहोदरः, यथा भट्टनायकमते, न रत्याद्यवच्छिन्नाया भग्नावरणायाश्रितोऽनुभवः, यथा पण्डितराज जगन्नाथनये, नापि भग्नावरणचिद्विशिष्टस्य रत्यादेरनुभवः, यथा रसगङ्गा-धरकारोऽभिनवगुप्तमतं बुध्यते स्म, अपितु निरवच्छिन्नपरमानन्दास्वाद एव।

***

# प्रमाणेषु शब्दस्य स्थानम्

**पण्डित मुरलीधरपाण्डेयः***

प्रमाणविषये बहवो मतभेदाः सन्ति। तत्र चार्वाकः प्रत्यक्षमेव प्रमाणमङ्गीकरोति। सौगतवैशेषिकौ प्रत्यक्षमनुमानं चेति द्वे प्रमाणे, साङ्ख्ययोगाश्च प्रत्यक्षमनुमानं शब्दं चेति त्रीणि प्रमाणानि, नैयायिकाः प्रत्यक्षमनुमानमुपमानं शब्दं चेति चत्वारि प्रमाणानि, प्राभाकराः प्रत्यक्षमनुमानमुपमानं शब्दमर्थापत्तिं चापि पञ्च प्रमाणानि, कुमारिलभट्टस्तथा वेदान्तिनस्त्वेतदतिरिक्तमनुपलब्धिमभ्युपगम्य षट् प्रमाणानि, पौराणिकास्तु प्रमाणेष्वैतिह्यं संभवं चेति संनिवेश्याष्टौ प्रमाणानि मन्यन्ते।

एवं शब्दप्रमाणस्य परिपन्थित्वेन चार्वाकः बौद्धा वैशेषिकास्त्रय उपतिष्ठन्ते। अतः शब्दस्य प्रमाणेषु स्थापनार्थमेतेषां त्रयाणामेव मतान्यत्रालोच्यन्ते। चार्वाकमतस्य प्रामाणिको ग्रन्थोऽद्यत्वे नोपलभ्यते। तस्य मतमितस्ततः प्रक्षिप्तं ग्रन्थेषु प्राप्यते। अतस्तदेवोद्धृत्य चार्वाकस्यैकप्रमाणवादस्योपहासः सौगतादिभिः कृतः। मोक्षाकरगुप्तेन तर्कभाषायां चार्वाक उन्मत्तः कथितः–'नानुमानं प्रमाणमिति च ब्रुवन् कथन्नाम नोन्मत्तश्चार्वाकः स्यात्।' यदि चार्वाकं प्रति पृच्छेत् यत् प्रत्यक्षमेव प्रमाणं भवान् कथमङ्गीकरोति, तदाऽस्य यदुत्तरं भविष्यति तदनुमानमूलकमेव भविष्यति। एवमेव वायोः स्वीकृतिरप्यनुमानमूलिकैव भविष्यति। यतो वायुर्न प्रत्यक्षः, तस्य कार्यं स्पर्श एव प्रत्यक्षम्, एवञ्च कारणभूतस्य वायोरनुमानं भवति। मोक्षाकरगुप्तस्यैकस्तर्को मार्मिकोऽस्ति। तेन कथितं यच्चार्वाकः खलु प्रत्यक्षलक्षणं परप्रतिपादनाय प्रणयति। परस्य च बुद्धिर्न प्रत्यक्षा, किं तर्हि? कायवाग्व्यापारादिकार्यादनुमेया। ततोऽनेन चार्वाकेण कार्यलिङ्गजमनुमानं बलादभ्युपगतं स्यात्। (तर्कभाषा, प्रत्यक्षपरिच्छेदः)।

एतद्रीत्याऽनुमानमन्तरा स्वल्पमपि कार्यं न प्रचलिष्यति। अधुना शब्दमन्तरापि

*सौजन्यम् : 'संस्कृति' डॉ. आदित्यनाथ झा अभिनन्दन ग्रन्थ (संस्कृत-खण्डः),डॉ. आदित्यनाथ झा अभिनन्दनग्रन्थ संयोजन-समिति, नई दिल्ली, 1969, पृ.सं.145-154



कानिचित् कार्याणि न प्रचलिष्यन्तीति दर्शयिष्यते। एतस्मात् प्राक् शब्दानङ्गीकारे चार्वाकस्य का वाचोयुक्तय इति प्रदर्श्यन्ते। स कथयति–'नापि शब्दस्तदुपायः काणादमतानुसारेणानुमाने एवान्तर्भावात्' (सर्वदर्शनसङ्ग्रहे 7 पृष्ठे)। एवं काणादसम्मतमनुमानप्रमाणमस्वीकुर्वन्नपि चार्वाकः शब्दप्रमाणखण्डनावसरे काणादमतमेवाङ्गीकृतवान्। अतः काणादमतस्य खण्डनेनैव चार्वाकोऽपि प्रत्युक्तः स्यादित्युक्त्वा काणादमतं सम्प्रति समालोच्यते।

**वैशेषिकमतेन शब्दप्रमाणस्यानुमानेऽन्तर्भावस्तन्निरसनं च**

प्रशस्तपादभाष्ये शब्दस्यानुमानान्तर्भाव एको हेतुः प्रदर्शितः–समानविधित्वाद् अर्थाद् अनुमानस्य ये चत्वारो विधयस्त एव विधयः शब्दस्यापि। शब्दस्यातिरिक्ता कापि विशेषता नास्ति। अतः शब्दस्यानुमान एवान्तर्भावः।

समानता च यथा–

| **अनुमितौ** | **शब्दे** |
|---|---|
| 1. व्याप्तिग्रहः | 1. शक्तिग्रहः |
| 2. लिङ्गदर्शनम् | 2. वाक्यश्रवणम् |
| 3. व्याप्तिस्मृतिः | 3. पदार्थस्मृतिः |
| 4. अनुमितिः | 4. वाक्यार्थबोधः |

किन्तु प्रशस्तपादस्य समानविधित्वादिति कथनेनैव ज्ञायतेऽनुमितौ शब्दे च समानता भवेन्नाम, तथापि शब्दस्यानुमितावन्तर्भावो न सम्भाव्यते। समानता पृथग्भूतयोः वस्तुनोरेव भवतीति रीत्या शब्दस्य पार्थक्यं स्पष्टं प्रतीयते। अनुमितौ व्याप्तिग्रहो भवति, शब्दे च शक्तिग्रहः, ग्रहसाम्यं त्वस्ति, किन्तु व्याप्तेः शक्तेश्च साम्यं को विवेकशीलो मन्येत? द्वितीयविधौ तु समतापि नास्ति, अनुमितौ लिङ्गदर्शनं भवति, शब्दे च वाक्यश्रवणं लिङ्गेन सह वाक्यस्य दर्शनेन सह श्रवणस्य साम्यं नास्ति। तृतीयविधौ स्मृतिसाम्यमस्ति। किन्तु व्याप्तेः पदार्थस्य च समता कथं भविष्यति? तुरीये विधावनुमितिर्भवति, शब्दे च वाक्यार्थबोधो भवति। अत्रापि न किमपि साम्यम्।

अपराप्यसमानता[1]–अनुमाने साध्यरूपेण धर्मेण सह धर्मिणः प्रतीतिर्भवति। किन्तु शब्दे न कस्यचिदपि पक्षस्य प्रतीतिसम्भवः। अर्थो न पक्षत्वेनोपस्थातुं शक्यः, तस्याज्ञातत्वात्। पक्षस्य च पूर्वत एव निश्चितिरावश्यकी। यदि शब्दः पक्षत्वेनोपस्थाप्येत, तर्ह्यनुमानस्य साध्यं किं भविष्यतीति प्रश्नः। अर्थवत्त्वं न साध्यत्वेनोपस्थातुं शक्यम्, यतः पर्वतादिपक्षाणां बाह्यादिसाध्यैर्यथा संयोगसमवायादयः सम्बन्धेन तथा शब्देन सहार्थस्य कोऽपि संबन्धो निर्धारयितुं शक्यते। शब्दार्थयोः प्रतिपाद्यप्रतिपादकसंबन्धः

एव सम्भाव्यते, किन्तु तस्य संबन्धस्य ज्ञानं शब्दादर्थप्रत्ययानन्तरं भविष्यति, न त्वर्थप्रतीतेः प्राक्। शब्दार्थयोर्व्याप्तिरपि ग्रहीतुं न शक्यते, यतो यस्मिन् देशे काले वा शब्दार्थौ, तस्मिन् देशे च काले च द्वयोर्विद्यमानतावश्यकी। कलियुगे युधिष्ठिररूपस्यार्थस्याभावेऽपि युधिष्ठिरशब्दस्य प्रयोगो भवति। अतः समानविधित्वाभावाद् न शब्दप्रमाणमनुमानेऽन्तर्भवितुमर्हति। धूमस्य वह्निना साकं न किञ्चिद् व्यभिचारोऽवलोक्यते किन्तु शब्देन सहार्थस्य व्यभिचारो दृश्यते। यथैकमेव चौरशब्दं दाक्षिणात्या भक्तार्थे किन्त्वार्यास्तस्करार्थे प्रयुञ्जते।

अपरोऽपि हेतुः शब्दस्यानुमानेऽन्तर्भावस्य विरोधी। सर्वेष्वनुमानेषु पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तीनां ज्ञानमपेक्ष्यते, न त्वाप्तोक्तत्वनिश्चयस्यापेक्षा। यदि शब्दे आप्तत्वनिश्चयानन्तरमेव प्रामाण्यम्, तदा शब्दस्यानुमानेऽन्तर्भावो दुर्लभः।

न्यायकन्दलीकारेणोपरिनिर्दिष्टानां युक्तीनां निरासाय प्रयत्नो विहितः। किन्तु स आभास एव। स्थालीपुलाकन्यायेनैकस्य समाधानस्याभासता प्रदर्श्यते। शब्दार्थयोर्व्याप्तिसाधनावसरे न्यायकन्दलीकारेणोक्तम्– 'अत्रोच्यते यदूर्ध्वीकृतायां तर्जन्यां देशकालव्यवहितेष्वर्थेषु दशसंख्यानुमानम्, न तत्र संख्या धर्मिणी, अप्रतीयमानत्वात्। नापि तर्जनीविन्यासो धर्मी, तस्य प्रतिपाद्यमानतया दशसंख्यया सह संबन्धातराभावेन तद्विशिष्टप्रतिपादनायोगात्। नाप्यनयोरेकदेशता, नाप्येककालत्वम्, कथमनुमानप्रवृत्तिः?' इत्यादि। ऊर्ध्वीकृतया तर्जन्या या दशसंख्यायाः प्रतीतिर्भवति, तत्र संकेतेनैव निदानेन भूयते। संकेतस्थले च नानुमानं प्रसरति। सा तु साक्षात् संकेतिताया अभिधाया एव विषयः। काव्यप्रकाशकारेण मम्मटेन भर्तृहरिप्रोक्तायामभिधानियामक'संयोगो विप्रयोगश्च' इत्यादिकारिकायां संकेतस्याप्यर्थनियामकता स्वीचक्रे।[2] अत्राप्यनुमाने अतोऽत्र धर्मिणोऽन्वेषणे प्रयास एव विफलः।

अनुव्यवसायपार्थक्याच्च नहि शब्दोऽनुमानेऽन्तर्भवितुमर्हति। अनुमितेरनुमिनोमीत्यनुव्यवसायो भवति। शब्दस्य च शाब्दबोधं करोमि (शब्दान् प्रत्येमि) इत्येवमनुव्यवसायो भवति।

उदयनाचार्यः शब्दप्रमाणस्य खण्डनावसरे पूर्वपक्षे पदार्थसंसर्गबोधरूपं शाब्दबोधमनुमानप्रमाणेन गतार्थयति। संसर्गबोध एव वाक्यार्थबोध इति शब्दप्रमाणवादिनः कथयन्ति। अस्य च संसर्गस्य बोधोऽनुमानेनापि सम्भवति। अत्र द्विप्रकारकेऽनुमाने उपस्थापयन्ति। एकस्मिन्ननुमाने पदं पक्षीकृतमपरस्मिंश्चानुमाने पदार्थः पक्षीकृतः। तद् यथा–



1. एतानि पदानि, तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि योग्यताकाङ्क्षासत्तिमत्पदकदम्बकत्वाद् घटमानयेति पदकदम्बकवत्।

2. एते पदार्था मिथः संसर्गवन्तो योग्यताकाङ्क्षासत्तिमत्पदोपस्थापितत्वात्, दण्डेन गामभ्याजेति पदस्मारितपदार्थवत्।

अस्य वैशेषिकमतस्य खण्डनं न्यायकुसुमाञ्जलिकारेणोक्तम्–

**अनैकान्तः परिच्छेदे सम्भवे न च निर्णयः।**
**आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना॥**

न्या.कु., स्त.3, का.13

अस्या अयमाशयः पदार्थपक्षकानुमाने एते पदार्थाः परस्परं संसर्गवन्तः केवलं संसर्गस्य सम्भावनैव सिद्ध्यति, न तु संसर्गो निश्चीयते। संसर्गसम्भावनया संसर्गनिर्णयो न जातः। यदि संसर्गो निश्चित इति मन्येत, तदा 'पयसा सिञ्चति' इत्यादौ व्यभिचारः। अत्र पयःशब्दस्य द्वावर्थौ जलं दुग्धं च। सिञ्चनक्रिया द्वाभ्यामप्यर्थाभ्यां सम्भवति। अतः 'पयसा सिञ्चति' इत्यनयोः पदयोर्योग्यताकाङ्क्षासत्तीनां सत्त्वात् पदार्थेषु सम्बन्धः सिद्ध्यति। किन्तु यत्र जलाभिप्रायेण पयःशब्दोऽभिहितस्तत्र जलस्य सिञ्चनेन सह संसर्गः वक्तृबुद्धावस्ति नतु दुग्धस्य, किन्तु योग्यताकाङ्क्षासत्तिमत्पदस्मारितत्वाद् इति हेतुना दुग्धेनापि तस्य संसर्गो वक्तव्यः। अतः सम्बन्धावश्यम्भावपक्षेऽनैकान्तिकोऽयं हेतुः।

यदि च सम्बन्धस्य सम्भावनापक्षो ग्रहीष्यते, तदा सम्बन्धो नैव निर्णीतः खलु। अतो न संसर्गस्य सिद्धिरनुमानाद् भवितुमर्हति। हरिदास भट्टाचार्यस्य शब्दा यथा– "अत्र पदार्थपक्षकानुमाने संसृष्टा एवेति यदि संसर्गवत्त्वं साध्यते, सम्भावितसंसर्गका इति संसर्गस्वरूपयोग्यत्वं वा, आद्ये पयसा सिञ्चतीत्यादावनैकान्तिकः। द्वितीये न संसर्गनिर्णयः, अन्वयप्रयोजकरूपयोग्यताया हेतुविशेषणीकृतत्वेन सिद्धसाधनाच्च।' कारिकायां 'परिच्छेदे' इत्यस्य 'अवश्यं संसृष्टे' इत्यर्थः। कारिकायाः पूर्वार्द्धस्यायमर्थः– एतानि पदानि, तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि, योग्यताकाङ्क्षासत्तिमत्पदकदम्बकत्वात्, घटमानयेति पदकदम्बवत् इतिपदपक्षकानुमानेऽयं दोष आपतति यदनुमाने लिङ्गज्ञानमेवोपयोगि। अनुमाने हेतुरूपाकाङ्क्षा ज्ञाता सत्येवोपयोगिनी किन्तु शाब्दबोधस्थले आकाङ्क्षाज्ञानस्य नहि, अपित्वाकाङ्क्षासत्ताया एवावश्यकता भवति। अर्थाद् अनुमाने ज्ञाता सती शाब्दबोधे च स्वरूपसत्याकाङ्क्षा भवति। अतो नानुमानेन संसर्गस्य सिद्धिः। अतः शब्दप्रमाणमावश्यकम्।

शाब्दबोधे आकाङ्क्षासत्तापेक्ष्यते, न तु तस्या ज्ञानमावश्यकम्। अनुमाने चाऽकाङ्क्षाया ज्ञानं हेतुर्न तु तस्याः सत्तावश्यकी। अतः शब्दानुमानयोर्भेदो वक्तव्यः। नानुमानस्य शब्देऽन्तर्भावः।

अत्र पूर्वपक्षी कथयति– अहमाकाङ्क्षाया हेतुत्वं न स्वीकरोमि, योग्यतासत्त्योरेव हेतुत्वं मन्ये। पूर्वपक्षस्येममभिप्रायमभिलक्ष्योदयनाचार्यो ब्रूते–'योग्यासत्तिरबन्धना' कारिकायाम् 'अबन्धना' इत्यस्य 'व्याप्तिशून्या' इत्यर्थः। अर्थाद् योग्योसत्तिः संसर्गेण सह व्याप्तिशून्या भवति। यत्र यत्र योग्यतासत्तिर्वा भवेत् तत्र तत्र संसर्गो भवेत् इति न व्याप्तिः। यथा– 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इति वाक्ये राज्ञः पदं पुत्रेण पुरुषेण चान्वेति। यतस्तस्य योग्यतासत्तिश्चोभाभ्यां सार्द्धमस्ति। किन्तु वक्तुः सम्बन्ध एकेन सहैवास्ति, द्वितीयेन न। द्वितीयार्थेन सह सत्यामपि योग्यतायामासत्त्यां न संसर्गाभावाद् न व्याप्तिः सम्भवति। हरिदासस्य शब्दा यथा–''द्वितीये प्रयोगे आकाङ्क्षा हि समभिव्याहृतपद-स्मारितपदार्थजिज्ञासा। घटमित्युक्ते आनय, पश्येति, आनयेत्युक्ते घटं पटं वेति जिज्ञासादयः। ननु योग्यतासहितासत्तिरेव हेतुरस्तु, तत्राह– योग्यतासत्तिरबन्धना इति व्याप्तिशून्या, अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम् इत्यत्र निराकाङ्क्षयो राजपुरुष-पदयोर्व्यभिचारात्।''

एवं शब्दस्यानुमानान्तर्भाविता कुसुमाञ्जलिकारेण साधिता। अनेन प्रतिवादित्वेनोपस्थितो वैशेषिको निरस्तः। बोद्धोऽपि प्रमाणद्वयादन्यस्य प्रमाणलक्षणमसंवादित्वं नास्ति, सति चैवान्तर्भावात् पृथङ् नोच्यते प्रमाणान्तरमिति वदन् निरस्तः।

**उच्यते न द्वयादन्यत्प्रमाणमुपपद्यते।**
**प्रमाणलक्षणायोगाद् योगे चान्तर्गमादिह॥**

तत्त्वसंग्रहे प्रमाणान्तरपरीक्षा, 1488श्लो.

प्रभाकरमतानुयायिनः शालिकनाथमिश्रादयोऽर्द्धं शब्दप्रमाणमङ्गीकुर्वन्ति। तेऽपौरुषेयतया वक्तृज्ञानानुमानासंभवाद् वेदस्य शब्दः प्रमाणमिति कथयन्ति। लौकिकवाक्यानां वक्तृत्वसंभवाद् वक्तृप्रामाण्यादेव वाक्यस्य प्रामाण्यसम्भवादनुमानात् प्रागेव संसर्गबोधो जायते, पश्चात् शब्दविधिनापि संसर्गो बुध्यतेऽतो लौकिकं वाक्यमनुवादकं भवति, न तु प्रमाणम्। तेषां मतं दूषयितुं कुसुमाञ्जलिकारः कारिकाद्वयमुपस्थापयति–

**निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णयः।**
**व्याप्तिस्मृतिविलम्बेन लिङ्गस्यैवानुवादिता॥** न्या.कु., स्त.3, का.14



**व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात्पदैरमी।**
**अन्विता इति निर्णीते वेदस्यापि न तत्कुतः॥**

न्या.कु., स्त.3, का.15

वेदे येषां संसर्गबोधस्य सामर्थ्यं निश्चितं तेषां तैर्वाक्यैरनुमानात् पूर्वं लोकेऽपि पदार्थसंसर्गरूपस्य वाक्यस्यार्थस्य निर्णये जाते तस्य पुनः संसर्गबोधकस्यानुमान-स्यैवानुवादकत्वमुचितम्। विलम्बेनानुमानस्य शब्दापेक्षया विलम्बितधीजनकत्वात्।

लौकिकवाक्ये यथाऽऽप्तोक्तत्वनिश्चयोऽपेक्ष्यते, तथैव वैदिके वाक्येऽपौरुषेयत्वनिश्चयो-ऽपेक्ष्यते। अतो भवद्रीत्या वैदिकवाक्येष्वप्यनुमानेन संसर्गस्य निर्णयः सम्भाव्यते। तथा च भवद्रीत्या वैदिकवाक्येऽप्यनुवादकत्वमापतितमिति। अतो वैदिक इव लौकिकोऽपि शब्दः प्रमाणम्।

बौद्धदर्शनस्य प्रधानग्रन्थे तन्त्रसङ्ग्रहे प्रमाणान्तरपरीक्षाप्रकरणेऽपौरुषयेयशाब्दप्रमाण-लक्षणस्य निरसनावसरे शान्तरक्षितेनोक्तम् यदपौरुषेयं वाक्यं नैव सम्भवति, व्यापिनः क्षणभङ्गस्य साधितत्वात्। सत्यपि संभवे तस्यार्थवत्त्वमसम्भवि। अतोऽपौरुषेयाद् वचनात् परोक्षार्थस्य ज्ञानसम्भवात् प्रमाणलक्षणं न सम्भवति–

**तत्राकर्तृकवाक्यस्य सम्भवार्थावसङ्गतौ।**
**तस्मादसम्भवि प्रोक्तं प्रथमं शाब्दलक्षणम्॥** तत्त्वसंग्रहे,1500

अकर्तृकवाक्यस्य सत्ताभावे द्वितीयश्लोकं प्रस्तौति–

**शक्ताशक्तस्वभावस्य सर्वदा ह्यनुवर्तनात्।**
**तदा तद्भावि विज्ञानं भवेन्नो वा कदाचन॥** तत्त्वसंग्रहे, 1501

एवम् (1500) पञ्चशतोत्तरैकसहस्रतमं श्लोकमारभ्य 1509तमं श्लोकं यावद् अपौरुषेयशाब्दप्रमाणलक्षणं निरस्तमनन्तरं 1510 श्लोकत आरभ्य 1512 यावत् पौरुषेयशाब्दलक्षणं दूषितम्। अनन्तरं 1513 इत्यत आरभ्य 1525 पर्यन्तं सामान्यतः शाब्दप्रामाण्यं दूषितम्। एतत्प्रकरणस्यान्तिमः श्लोकः शाब्दप्रमाणस्यानुमानेनैव गतार्थतामङ्गीकरोति।

**एवं स्थितेऽनुमानत्वं शब्दं धूमादिवद् भवेत्।**
**त्रैरूप्यसहितत्वेन तादृग्विषयसत्त्वतः॥** तत्त्वसंग्रहे 1525

एवं च न्यायकुसुमाञ्जलेः पूर्वोक्तोद्धरणेन पूर्वं साधितं यदनुमाने शब्दप्रामाण्यस्य

नान्तर्भाव इति। तेनैव शब्दप्रमाणस्य तत्त्वसंग्रहोक्तानुमानान्तर्गतभावप्रक्रिया निरस्ता।

योगिराजो भर्तृहरिस्तु शब्दविषयेऽनुमानस्य पङ्गुतामनेकाभिर्युक्तिभिरसाधयत्। तेन कथितम्–यदनुमानस्य लौकिकपदार्थेष्वपि शक्तिभेदेन व्यभिचारो भवति।

**अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु।**
**भावानामनुमानेन प्रसिद्धिरतिदुर्लभा॥**

वाक्यपदीयम्, का.1.का.32

यथाऽऽर्द्रायाः पिप्पल्याः कफजननशक्तिः शुष्कायाश्च त्रिदोषशमनशक्तिः, हैमवतीनामपामतिशीतः स्पर्शः, अग्निकुण्डादिषूष्णः, हेमन्ते कूपोदकमुष्णम्, ग्रीष्मे च शीतम्, एवं च जलत्वहेतुनोष्णत्वस्य शीतत्वस्य च नानुमानं व्यभिचारात्। एवञ्च, यदि लौकिकेषु पदार्थेष्वियं दुर्व्यवस्थाऽनुमानस्य, तर्हि का वार्ताऽप्राकृतगम्ये धर्म इति तमागमचक्षुरन्तरेणाऽनुमानमात्रेण को मूढः साधयितुं प्रयतेत[3] ?

शाङ्करभाष्येऽप्युक्तम्–"तस्मात् शब्दमूल एवातीन्द्रियार्थयाथात्म्यावगमः" शक्तिप्रतिबन्धेनापि व्यभिचारो भवति। अतोऽपि नानुमानस्य सामर्थ्यम्।

**निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियां प्रति।**
**विशिष्टद्रव्यसंबन्धे सा शक्तिः प्रतिबध्यते॥**

वाक्यपदीयम्, का.1, का.33

भर्तृहरिर्व्याप्तिज्ञानजन्यत्वाभावादपि शब्दस्याऽनुमानान्तर्भावं निषेधति। यथा परेभ्यो वक्तुमशक्यं मणिरूप्यादिविज्ञानं रत्नवेत्तॄणामभ्यासादेव जायते नेन्द्रियादिभ्यः, न वानुमानात्, व्याप्तिज्ञानाजन्यत्वात्। नापि प्रत्यक्षं स्वस्थैरपीन्द्रियैरभ्यासविरहितैरधिगन्तुमशक्यत्वाद् इन्द्रियमात्राजन्यत्वात्। अतः शब्दस्यापि व्याप्तिज्ञानाजन्यत्वाद् नानुमानेऽन्तर्भावः।

**परेषामसमाख्येयमभ्यासादेव जायते।**
**मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम्॥**

वाक्यपदीयम्, का.1, का.35

मुक्तावलीकृताप्युक्तम्–"तत्र सम्यग् विना व्याप्तिबोधं शब्दादिबोधतः।" एवं लोकेप्यनुमानप्रसारस्यावरोधो दर्शितः। अनन्तरं भर्तृहरिणा स्वसामयिकीं कुड्यादीनामवयवविभागमन्तरैव गृहान्तःस्थितवस्तुविषयिकां दर्शनरूपां सत्यघटनामुपस्थाप्य दर्शितं यत् प्रत्यक्षमनुमानं यत्र बाधिते, तत्राप्यदृष्टविशेषजन्यं किमपि ज्ञानं भवति। एवमेव शब्दमूलकं लौकिकं ज्ञानं भवति।



**प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः।**
**पितृरक्षःपिशाचानां कर्मजा एव सिद्धयः॥**

वाक्यपदीयम्, का.1, का.36

अलौकिकस्याप्यार्षज्ञानस्याऽऽगममूलकत्वम्। एवञ्च, शब्दप्रमाणात् कुड्यादीनामवयवविभागमन्तरेण गृहान्तःस्थितवस्तुविषयकं दर्शनं तत्र शब्दप्रमाणस्यैव शक्तिः, न तत्र प्रत्यक्षप्रमाणमनुमानं वा प्रसरति। कथं पुनः प्रत्यक्षेऽनुमाने वा शब्दप्रमाणस्यान्तर्भावः? य ऋषय इन्द्रियैरग्राह्यान् अतएव प्रत्यक्षपूर्वकैरनुमानादिभिरप्यग्राह्यान् पदार्थान् आर्षेण चक्षुषा पश्यन्ति, तेषां वचनानामतीन्द्रियार्थे प्रवर्तितुमशक्तेनाऽनुमानेन कथं बाध्यते?[4]

**अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा।**
**ये भावान् वचनं तेषां नानुमानेन बाध्यते॥**

वाक्यपदीयम्, का.1, का.38

भर्तृहरिणा या सत्यघटना स्वसामयिक्युपस्थापिता तत्समा घटनाऽद्यापि प्राप्यते। पीटरहर्कोसनामक एको युवा हालैण्डदेशीयः कस्यापि वस्तुनोऽतीतानागतं ज्ञानं प्रत्यक्षवत् पश्यति।[5] तस्य दर्शनमतीन्द्रियमतः प्रत्यक्षपूर्वकेणानुमानेन न ग्राह्यं केवलं शास्त्रगम्यम्। पितृरक्षपिशाचानामदृष्टजा सिद्धिरिवादृष्टं च शास्त्रविहितकर्मविशेषजन्यमेव भवति।

विवरणप्रस्थानानुयायिभिर्दशमस्त्वमसीत्यादिस्थले शब्दादप्यपरोक्षज्ञानं स्वीकृतम्। तेषां मते श्रवणस्य ब्रह्मसाक्षात्कारं प्रति प्रधानकारणता। मनननिदिध्यासने तु श्रुतार्थमेव पुष्णीतः। पञ्चदशीकारेण यथोक्तम्–

**वाक्यं प्रतिबद्धं सत् प्राक्परोक्षावभासते।**
**करामलकवद् बोधमपरोक्षं प्रसूयते॥**

विवरणप्रस्थानन्यानेन सिद्धान्तेन प्रत्यक्षप्रमाणस्य महत्त्वमायाति। अतोऽस्मिन् स्थले भामतीप्रस्थानस्य मतमेव ज्यायः प्रतीयते। भामतीप्रस्थाने शब्दप्रमाणेन परोक्षमेव ज्ञानं भवति, न त्वपरोक्षम्। ब्रह्मसाक्षात्कारः श्रवणानन्तरं कृताभ्यां मनननिदिध्यासनाभ्यां शुद्धेनान्तःकरणो भवति।

अद्य यावद् शब्दप्रामाण्यवादिभिरनुमाने शब्दस्यान्तर्भावखण्डनावसर आलङ्कारिकदृष्टिरुपेक्षिता मम्मटेनानिरसनीयाभिर्युक्तिभिः शब्दस्य व्यापाररूपेण व्यञ्जना पोषिता। व्यक्तिविवेककारेण ध्वन्यालोकस्य खण्डनावसरे या उक्तयः प्रदर्शितास्तासां निराकरणं मम्मटेन कृतम्। तत्रोपस्थापिता हेतवो हेत्वाभासाः कृताः। शक्तिवादस्य टीकाकृता

हरिनाथतर्क-सिद्धान्तभट्टाचार्येण व्यञ्जनाखण्डनायाऽन्य उपाय आश्रितः। अनुमानशरणं विहाय व्यङ्ग्यार्थस्य स्मृतिसहकारेण मानसबोधत्वं स्वीचकार। ''स च सम्भवति व्यञ्जनाया अपि वृत्तित्वावश्यकत्वात्, अन्यथा 'मुखं विकसितस्मितम्, वशितवक्रिमप्रेक्षितम्' इत्यादौ परस्परविभागजनकक्रियारूपविकासस्य मुखे बाधाल्लक्षितार्थस्य विस्तृतस्यान्वयबोधानन्तरं मुखे कुसुमतुल्यसौरभवत्तायाश्चमत्कृतीरमणीयताया वा बोधस्यानुभवसिद्धस्यापलापापत्तिरिति चेन्न। मनसैव तत्तत्पदार्थस्य स्मृतिसहकोरण बोधनिर्वाहात्। तदर्थं व्यञ्जनाया वृत्तेः कल्पनाया अनावश्यकत्वात्।'' (शक्तिवादे विवृतिव्याख्यायां सामान्यकाण्डे)

विवृतिकारेणोपरितरपङ्क्तिभिर्यद् व्यञ्जनाया अनावश्यकत्वं प्रदर्शितम्, तन्न रुचिकरम्। कुसुमतुल्यसौरभवत्तारूपार्थस्य स्मृतिसहकृतमानसबोधस्वीकारेऽपि व्यञ्जनाया अनावश्यकता नापकृता भवति। अभिधयाऽपि स्मृतिसहकारेण मनसैव बोध एवं लक्षणयापि स्मृतिसहकारेण मनसैव बोधस्तथैव व्यञ्जनयापि व्यङ्ग्यार्थस्य बोधः स्यादतो व्यङ्ग्यव्यञ्जनाऽऽवश्यकी। यथा स्मृतिसहकारेण वाच्यार्थस्य मनसा बोधस्तथा स्मृतिसहकारेणैव लक्ष्यार्थस्यापि मनसा बोधः। पूर्वत्र त्वभिधा, उत्तरत्र च लक्षणा नैयायिकैरङ्गीक्रियते। स्मृतिसहकृतमानसबोधत्वेऽपि यदाऽभिधाया लक्षणायाश्च पार्थक्येन स्थितिरवगम्यते, तदा व्यङ्ग्यार्थस्य कृते व्यञ्जनाया अप्यावश्यकताऽऽपतति, तुल्यन्यायात्। एवं यदि व्यञ्जना सिद्ध्यति, तदा शब्देन येषां व्यङ्ग्यार्थानामवगतिर्भवति तेषामनुमानेनावगतिरसंभाविनी, तत्र व्याप्तेरभावात्।

महिमभट्टेन–भ्रम धार्मिक विश्वस्त स श्वाद्य मारितस्तेन गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेन, उत्पन्नव्याप्तिरेकव्याप्तिमाश्रित्य गोदावरीतीरम्, भीरुभ्रमणायोग्यम्, भयकारण-सिंहोपलब्धेः, यद् यद् भीरुभ्रमणयोग्यं तत्तद् भयकारणाभाववद् यथा गृहं न चेदं तीरं तथा भयकारणाभाववत् सिंहोपलब्धेः, तस्माद् भीरुभ्रमणायोग्यम् इति पञ्चावयववाक्यरूपानुमानेन भ्रमणनिषेधं साधयति व्यञ्जनावृत्तिं च खण्डयति। किन्तु महिमभट्टोऽस्य हेतावनैकान्तिकविरुद्धस्वरूपासिद्धरूपान् त्रीन् हेत्वाभासान् दर्शितवान्।[6]

अनेन प्रकारेण निश्चीयते, यदि भ्रमधार्मिकोत्पन्नविधिरूपवाक्यार्थन विरुद्धो यो निषेधरूपोऽर्थः प्रतीयते, स शब्दस्य वृत्तिव्यञ्जनया, न त्वनुमानेन। यदि शब्दप्रमाणं नाङ्गीक्रियेत, तदा व्यङ्ग्यार्थस्य प्रतीतौ किं कारणं स्यात्।

उपरितनपङ्क्तिषु चार्वाकस्य, वैशेषिकस्य, बौद्धस्य च शब्दप्रमाणपरिपन्थिनां मतान्यालोचितानि। शब्दस्याऽनुमानेऽन्तर्भावोऽसम्भवी च प्रदर्शितः। वस्तुतस्तु प्रत्यक्षप्रमायाः करणं शब्दप्रमाणमप्यङ्गीकरणीयम्। यथा–'पर्वतो वह्निमान्' इति स्थले पक्षस्य हेतोश्च प्रत्यक्षप्रमाणविषयत्वेऽपि वह्नेरविषयत्वाद् अनुमानप्रमाणस्यावश्यकता तथैवाऽतिवाहिकशरीर-



देवताप्सरआदिभावानां प्रत्यक्षानुमानयोरविषयत्वात् शब्दप्रमाणमावश्यकम्। लोकेऽपि बहून्येतादृशानि स्थलानि सन्ति, यत्र शब्दप्रमाणमन्तरा न निर्वाहो भवितुमर्हति। कस्यचिद् बालकस्याकृत्या तस्य पिताऽनुमातुं शक्यते, किन्तु तदनुमानं सर्वत्र नाव्यभिचारि तत्र त्वाप्तायाः मातुः शब्द एव शरणम्।

***

## सन्दर्भाः

1. प्रशस्तपादभाष्यस्य न्यायकन्दली (अनुमाने शब्दान्तर्भावप्रकरणम्)
2. का.प्र., द्वितीय उल्लासः-'आदिग्रहणात् एतावन्मात्रस्तनिका, एतावन्मात्राभ्यामक्षिपात्राभ्याम्, एतावन्मात्रावस्था, एतावन्मात्रैर्दिवसैः इत्यादावभिनयादयः।'
3. वाक्यपदीयस्य पण्डितश्रीसूर्यनारायणशुक्लकृतभावप्रदीपटीकायाम्।
4. वाक्यपदीयम्, का.1, का.26 वृत्तिः
5. 'नवनीत' (हिन्दी डाइजेस्ट), नवम्बर 1964 इत्यसौ अङ्को द्रष्टव्यः।
6. काव्यप्रकाशः, 5/47 अत्रोच्यते भीरुरपि गुरोः प्रभोर्वा प्रियानुरागेण, अन्येन चैवं भूतेन सत्यपि भयकारणे, भ्रमतीत्यनैकान्तिको हेतुः शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि। गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद् वा न निश्चितः, अपितु वचनात् न च वचनस्य प्रमाणमस्ति, अर्थेनाप्रतिबन्धादित्यसिद्धश्च। तत् कथमेवंविधाद्धेतोः साध्यसिद्धिः।

***

# लिङ्गविमर्शः

**पण्डितश्रीकृष्णशास्त्री मोकाटे***

स्वमहिम्नि प्रसिद्धेऽपि बहुचर्चाचर्चितोऽयं विचारः तत्र यद्यपि चेतने लोकानुगतं व्यावहारिकं लिङ्गस्य स्वरूपं साधारणानामपि सुपरिचितमेव, परमचेतने खट्वादौ वृक्षादौ वा किं तत्स्वरूपं यदधिगम्य लोके अनादिव्यवहारः शास्त्रीयञ्च किं स्वरूपं यदभिलक्ष्य शास्त्रेषु व्यवहारः? उभयानुगतं चेतनाऽचेतनसाधारणञ्च लोके किं स्वरूपम्? अथ शास्त्रीयञ्च किम् इत्येतत्सर्वमेतस्मिन् प्रस्तुते लेखे समासतः शास्त्रीयदृशा मयोपनिबध्यते येनोभयानुगतं लौकिकं शास्त्रीयञ्च किमपि रूपं लोकैर्विज्ञायेतेति विचार्य किञ्चिन्निगद्यते मयात्र वाक्यपदीयानुसारेण, तथाहि–

लोके यद्यल्लिङ्गं दृष्ट्वा अयं पुमान्, इयं स्त्री, इदं नपुंसकमिति प्रतीयते तदिहादौ पक्षद्वयेन निर्दिष्टम्–

स्तन-केश-कलापप्रजननादिरूपव्यञ्जनैरवयविनः सम्बन्धः संयोगसमवायलक्षणो लिङ्गमथवा तेन विशिष्टाः स्तनादय इति।

तदुक्तम्– **स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**
**उभयोरन्तरं यच्च तदभावे नपुंसकम्॥** (श्लोकवार्तिकम्)

इत्युभयव्यञ्जनाभावात्तदभावे व्यञ्जनविशेषबलसाम्याच्चानेनैव नपुंसकत्वमपि लक्षितं तदभावे नपुंसकमित्येवोक्तेऽव्ययानां तिङन्तानाञ्च तत्प्रसङ्गः, उभयोरन्तरमित्युक्ते कुक्कुट-मयूर्याविति लिङ्गसमुदायविषये नपुंसकत्वं स्यादित्युभयमुपात्तम्। यत्र यत्र लिङ्गान्तराभावे तुल्यजातीयं स्त्रीपुंसव्यतिरेकेण लिङ्गान्तरं सोऽर्थो नपुंसकलिङ्गयुक्त इत्यर्थः। अत्र मत्वर्थीयेन य एव सम्बन्धविशेष उक्तः स एवेहानूद्यते, स्तनकेशसम्बन्धस्योपलक्षणत्वात्। प्रसवयोनि-विशेषादियथास्वं दृष्टो विशेष इहादिग्रहणात् गृह्यन्ते तेन लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रकुंसे टाप् प्रसज्यते। न त्वं खरकुटीः पश्येति चोद्यं नावतरेत्। लोके हि यो दृष्टः सम्बन्धस्तमनूद्य

*सौजन्यम् : 'संस्कृति' डॉ. आदित्यनाथ झा अभिनन्दन ग्रन्थ (संस्कृत-खण्डः),डॉ. आदित्यनाथ झा अभिनन्दनग्रन्थ संयोजन-समिति, नई दिल्ली, 1969, पृ.सं.263-267



लक्षणे क्रियमाणे नातिप्रसङ्गो भवति, एतत्तु दर्शनद्वयमचेतनानां स्तनादिरहितत्वाद-व्यापकमित्यतः पक्षान्तरेण विचार्यते। अथात्र वैशेषिकाः–

सर्वत्राभिन्नाभिधानप्रत्ययोन्नीतसद्भावां जातिं मन्यन्ते इति स्तनाद्युपव्यञ्जनाभिव्यक्त-विशेषा स्त्रीत्वपुंस्त्वनपुंसकत्वरूपा लिङ्गं जातिरित्याहुः–

'सा चाचेतनस्यापि यथास्वमुपव्यञ्जनाभिव्यक्ता विद्यत' एव।

अथ स्तनाद्युपव्यञ्जना जातिः कथमचेतने, नहि तत्र स्तनादयः सन्ति। अथादिग्रहणात् यथायथं विशिष्टमेवोपव्यञ्जनमेवं सति पूर्वोक्तमपि पक्षद्वयं नाव्यापकमचेतनेष्वपि यथा स्वमुपव्यञ्जनविशेषणस्य ग्रहणात्,अस्ति हि खट्वादीनामपि किञ्चिन्निमित्तं यद्वशात् स्त्र्याद्याकारप्रत्ययप्रसवः, सत्यमेतद् अर्थव्यक्तिवस्तुशब्दानां तु त्रिलिङ्गानां सर्वभावेष्वव्याहत-प्रसरत्वात्। त्रिलिङ्गयोगस्तदाकारप्रत्ययान्यथानुपपत्त्याऽनुमीयते, तत्र च परस्परविरोधिनियत-व्यञ्जनसम्बन्धरूपं लिङ्गत्रयं लौकिकं कथं स्यात्, अतो जातिपक्षावलम्बनं जातीनां हि सर्वगतत्वादेकाश्रयसमवायित्वं वह्वीनामप्युपपाद्यते वैशेषिकैः। सांख्यास्तु सत्त्वरजस्तमसां गुणानां सततपरिणामिनामुपचयापचयमध्यस्थलक्षणा अवस्थाविशेषा यथायोगं पुंस्त्वादिलिङ्ग-मातिष्ठन्ते।

तदेतद्भाष्यकाराभिमतं दर्शनं संस्त्यानप्रसवस्थितयोऽपिहितस्य लिङ्गं तथा चाह– संस्त्यानप्रसवौ लिङ्गं, सर्वाश्च पुनर्मूर्तयः, एवमात्मिकाः संस्त्यानप्रसवगुणा इति वदता वृक्षादावपि लिङ्गयोग उपपादितो भवति, त्रिलिङ्गता च अयमर्थिताः,तत्र संस्त्यानं संहननं प्रतिलयस्तिरोधानं, इत्यवस्थाः स्त्रीत्वं प्रसवः प्रवृत्तिराविर्भाव इति पुंस्त्वम्, न स्त्रीपुंसौ नपुंसकमिति स्थितिर्नपुंसकमिति लभ्यते।

अवस्थाविशिष्टा वा गुणा एव लिङ्गमित्यप्यत्रैव दर्शने पक्षान्तरम्। ते हि कार्यान्तरवत् स्त्र्याद्यवभासमपि प्रत्ययमुपजनयन्तो भवन्ति लिङ्गव्यपदेश्याः एकस्यापि वस्तुनः शब्दभेदादर्थो व्यक्तिर्वस्त्विति लिङ्गभेदस्य दर्शनात्।

बहिरसन्नेव शब्दैरुत्पादित इव बाह्ये वस्तुनि लिङ्गयोग इति शब्दाभिधेयस्वभावो लिङ्गमिति केचित्।

तटस्तटीतटमित्यभिन्नेनापि शब्देनाभिन्नं वस्तु त्रिलिङ्गं प्रत्याय्यत इति शब्दसंस्कार-मात्रं लिङ्गमाश्रीयते कैश्चित्।

सम्प्रति शब्दशक्तिस्वभावानुसारेणापरं विकल्पसप्तकमुच्यते।

तदाह भर्तृहरिस्तृतीये काण्डे–

**उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः।**
**विकल्पसंनियोगाभ्यां ये शब्देषु व्यवस्थिताः॥**

उपादानं शब्दैर्विशिष्टशक्तिभिरर्थोपाधित्वेन ग्रहणं लिङ्गानाम्। तस्य सप्त भेदाः। लिङ्गाभिव्यञ्जकशब्दशक्तिं प्रति नियताध्यासकार्यलिङ्गानां गुणावस्थादिरूपाणां सर्वत्र सम्भविनामपि तथा विकल्पे स्त्रीपुंनपुंसकानां शब्दैः प्रत्यायने चत्वारो भेदाः, संनिगो मोनियमः तेन त्रयो विकल्पाः, तद्यथा वृक्षादयः पुंस्येव नियताः, खट्वादयाः स्त्रियामेव, दध्यादयो नपुंसक एवेति सप्त विकल्पाः। अथेदानीं जातिपक्षोऽत्र विचार्यते–लौकिकस्य लिङ्गलक्षणस्योपेक्षणात् तत्र गोत्वादीनामिव स्त्रीत्वादीनामेकत्र कथं न विरोध इत्याशङ्कायामाह तत्रभवान् भर्तृहरिः–

**तिस्रो जातय एवैताः केषांचित् समवस्थिताः।**
**अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः॥**

स्त्रीत्वाद्यनुरक्तप्रत्ययोत्पादेन सर्वत्राविरुद्धसमवायाः स्त्रीत्वादिजातयो विरुद्धैकार्थ-समवायाभिर्गोत्वमहिषत्वजातिभिः सहैकस्मिन् आश्रये वर्तन्ते, भिन्नजातीयेष्वपि स्त्र्याद्याकार-बुद्धेरनुगमात् जात्यन्तरैः स्त्रीत्वादिजातीनामविरुद्ध एकार्थसमवायसत्त्वात् कथमासां जातीनां गोत्वादिभिरविरुद्धत्वं न स्यादिति नाशङ्कनीयम्।

**तदुक्तं हस्तिन्यां वडवायाञ्च स्त्रीति बुद्धेः समन्वयः।**
**अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम्॥**

शब्दप्रमाणकानां शब्दार्थोऽर्थ इति सर्वत्र द्रव्यगुणकर्मसामान्यादावपि लिङ्गजाति योगः कल्प्यते। तथा च स एवार्थः केनचिच्छब्देन नियतलिङ्गोऽभिधीयमानस्तल्लिङ्ग-जातियोगो शब्दानामन्तरेण तु लिङ्गं जात्यन्तरयोगः प्रत्याय्यते। तद्यथा, भावशब्देन पुंस्त्वपाधिः सतोच्यते, सत्ताशब्देन स्त्रीत्वोपाधिः, साम्यशब्देन नपुंसकत्वोपाधिः इति शब्दशक्त्यनुसारेणैव सर्वत्र लिङ्गोपाधिव्यवस्थिताः। शब्दा द्रव्यायमाणं वस्त्वाचाक्षणास्तद्धर्म-लिङ्गोपाधितयैव तत्र तत्र प्रवर्तन्ते। एवञ्च लिङ्गेष्वपरो लिङ्गयोगस्तद्यथा स्त्रीत्वं स्त्रीता, स्त्रीभाव इति। तदेवाह–परतन्त्रस्यल्लिङ्गमपोद्धारे विवक्ष्यते।

**तत्रादौ शब्दसंस्कारः शब्दैरेव व्यवस्थितः।**
**बुद्धाकल्पितरूपेषु लिङ्गेष्वपि च सम्भवः।**
**स्त्रीत्वादीनां व्यवस्था हि सा लिङ्गैर्व्यपदिश्यते॥** इति।

तथा चैवं बहिर्विद्यमानलिङ्गनिमित्तमन्यत्राध्यस्तोदकभाववदिहाप्यन्यत्राध्यस्त-स्त्रीत्वाद्यसदध्यारोपितं प्रतीयत इत्यचेतनानामपि सुष्ठुलिङ्गं व्यवस्थापितं भवति।

तदुक्तं– **यथा सलिलनिर्भासो मृगतृष्णासु जायते।**
**जलोपलब्ध्यनुगुणाद्बीजाद् बुद्धिर्जलेऽसति॥**



**तथैवाव्यपदेश्येभ्यो हेतुभ्यस्तारकादिषु।**
**मुख्येभ्य इव लिङ्गेभ्यो भेदा लोके व्यवस्थिताः॥**

अथ यथादित्यगतिर्देशान्तरे प्राप्त्याऽनुमीयते वस्त्रान्तर्हितञ्च वस्तु वस्त्रापाये व्यवधाने निवृत्ते साक्षाद् गृह्यते नैवं लिङ्गं जातिः, खट्वावृक्षादौ न कदापि परिलक्ष्यते, अथ च लिङ्गकार्यस्य खट्वावृक्षादौ टाबादेर्दर्शनं लिङ्गानुमानं तदपि न एतदेवाह–

**नचालमनुमानाय शब्दो दर्शनपूर्वकः।**
**सिद्धे हि दर्शने किंस्यादनुमानप्रयोजनम्॥**

सदेवं लौकिकं लिङ्गमचेतनेष्वव्याप्तमतोऽवश्यञ्च कश्चित् स्वकृतान्तः आस्थेय इति भाष्ये संस्त्यानप्रसवौ लिङ्गस्त्रीपुंसलक्षणमुक्तम्। उभयधर्मसाम्यरूपा स्थितिर्नपुंसकमित्यर्थादुक्तं भवति। तदेव भाष्यतात्पर्यं व्याचष्टे–

**आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः।**
**धर्ममूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः॥** इति।

संस्थाने स्त्यायतेर्ड्रट् स्त्री सूतेस्सप् पुमान् इति, स्त्यानं संहननमापद्यद् अस्यां गर्भ इत्यधिकरणं स्त्री, प्रसव उपचये डुम्सुन् प्रत्यये परतस्सकारस्य पकारादेशे पुमानिति सूत्यर्थे वृत्तिं सूचयति।

तथाचाकाशादिषु पृथिव्यन्तेषु शब्दादयः पञ्चगुणाः समुदायभावमापद्यन्ते इति शब्दादिगुणाः सत्त्वरजस्तमो लक्षणगुणमया इति गुणे गुणे शब्दादौ सत्त्वादिगुणत्रय-धर्माव्यवस्थितास्तत्र प्रकाशः प्रसव आविर्भावः सत्त्वधर्मः, प्रवृत्तिः क्रिया रजोधर्मः, आवरणं तिरोभावः स्थितिस्तमोधर्मः, एत एव धर्माः लिङ्गं तथाचाविर्भावतिरोभावयोः, व्यापकत्वात्सर्वत्र स्त्रीपुंसलिङ्गयोगः। यद्येवं कोऽवसरो नपुंसकस्येति चेदाह–

**प्रवृत्तेरेकरूपत्वं साम्यं वा स्थितिरुच्यते।**
**आविर्भावतिरोभावप्रवृत्त्या व्यवतिष्ठते॥**

तदेवं सततपरिणामिनां गुणानामध्यवसायवशेन स्वभावैक्यं साम्यं तिरोभावपर्यवसानं वेति प्रकारत्रयेण स्थितेरुपपादनान्नपुंसकत्वमपि सिद्धमेवेत्थं भाष्योक्तं भर्तृहरिणा विस्तरेण व्याख्यातमिह समासतो मयातिव्यापकं चेतनाचेतनसाधारणं तत्स्वरूपं प्रदर्शितमित्यलम्।

***

# भट्टनारायणीयनाटकस्य भाषिकी संरचना

**डॉ. धनञ्जय वासुदेव द्विवेदी**

सकललोकव्यवहाराणां प्रकाशिका अज्ञानतिमिरापहा भाषा सर्वविधशास्त्राणां काव्यादीनां च प्रवाहकत्वेन विराजते। तत्र काव्यस्य नाटकस्य वा भाषायाः वैशिष्ट्यं परिलक्ष्यते। काव्येतरशास्त्रेषु वाच्यार्थप्रतिपादिकाः वाचकशब्दा एव प्राधान्येन प्रयुज्यन्ते। परन्तु चतुर्वर्गसाधकस्य ह्लादैकमयस्य नवरसरुचिरस्य सद्यःपरमानन्दप्रदायकस्य मानवचित्तवृत्तिपरिष्कारस्य प्रीतिकीर्तिसम्पादकस्य च काव्यस्य भाषा लक्षणाव्यञ्जनामयी भवति।

तत्रापि काव्येषु नाटकं रम्यमिति मन्यते। सामान्यतया सर्वविधकाव्यं मनोहरमेव भवति। तथापि रसोन्मेषे नाटके किञ्चिद् वैशिष्ट्यं भवति। श्रव्यकाव्यैः कविः स्वयमनुभावविभावानां वर्णनेन कथनेन चित्रणेन च तादृशीम् अलौकिकीं स्थितिमुत्पादयति यया श्रोतुः हृदये शीघ्रमेव रसोन्मीलनं भवति। रूपकेऽपि इदमेव कार्यं भवति, प्रयोजनमपि इदमेव, परन्तु तत्राभिनयस्य प्रामुख्यम्। तद्वारा झटिति एव सर्वसाधारणोऽपि जनः रसास्वादमाप्नोति। निर्विवादमिदं यत् श्रुतवस्त्वपक्षेया दृष्टवस्तुनि प्रभावोत्पादकता आकर्षणञ्चातिशयेन तिष्ठति। अत एवोक्तं मुनिना भरतेन–'नाट्यमेव रसः' 'रससमुदायो हि नाट्यम्।'

पुनश्च महनीये नाटके प्रतीकात्मकता ध्वन्यात्मकता चित्रात्मकता सहृदयग्राह्यता च विद्यते। अत्याचारभ्रष्टाचारशोषणादिसामाजिककुरीतीः प्रति संघर्षः युगचेतनाया विकासश्च प्राप्यते। भाषायां प्रवाहः गतिशीलता वर्ण्यविषयस्य प्रकाशनक्षमता चानुपदं विलोक्यते।

साम्प्रतमस्माकं विवेच्यविषयोऽस्ति भट्टनारायणस्य नाटकस्य भाषिकी संरचना। 'वेणीसंहारम्' महाकवेर्भट्टनारायणस्य एकमात्रं नाटकं संस्कृतसाहित्येऽतितरां लब्धख्याति वर्तते। शास्त्रीयदृष्ट्या इदमेकं मनोज्ञमादर्शमयञ्च नाटकं मन्यते नाट्यकलाविद्भिराचार्यैः।



नाटकमिदं पञ्चसन्धिसमन्वितं परमप्रख्यातस्य महाभारतस्य एकस्या महत्त्वपूर्णघटनाया उपरि आश्रितं चास्ति।

नाटकेऽस्मिन् वीररसोऽङ्गी, शृङ्गारशान्तरौद्ररसा अङ्गरूपेण विराजन्ते। कथावस्तु इदमस्ति– महाभारतस्य द्यूतप्रकरणे साधुजनविगर्हितः दुष्कर्मकारी दुःशासनः एकस्यां शिष्टजनसभायां द्रौपद्याः केशं गृहीत्वा तामपकृष्टवान्। मानवत्याः तस्याः कृते इदम् असह्यम् अवमाननम् आसीत्। सा इमां प्रतिज्ञां कृतवती यत् यावत्कालमवमाननस्यास्य प्रतीकारो न विधीयते अर्थात् दुःशासनदुर्योधनौ न हन्येते तावत्कालं सा स्ववेणीं नैव ग्रन्थयिष्यति। अन्ते च प्रतिशोधोऽयं पूर्णो भवति। अस्या एव घटनायाः पूर्तौ महाभारतस्य कृत्स्नं कथानकं अत्यन्तं कौशलेनात्र विन्यस्तम्। अत्याचारं प्रति यादृशो विरोधोऽत्र प्रकटितः तादृशोऽन्यत्र दुर्लभः।

नाटकस्यास्य भाषिकी संरचना सुतरां श्लाघ्या। कुसुमाञ्जलेरिवास्य भाषायाः लालित्यं मनोहारित्वमनुपदमवाप्यते। काव्यप्रबन्धस्यास्य प्रसङ्गे सूत्रधारस्येयं सूक्तिः सुतरां समीचीना–

**कुसुमाञ्जलिरपर इव प्रकीर्यते काव्यबन्ध एषोऽत्र।**
**मधुलिह इव मधुबिन्दून्विरलानपि भजत गुणलेशान्॥**[1]

अर्थात् अस्यां सभायां द्वितीयः पुष्पाञ्जलिरिव इयं काव्यरचना विस्तार्यते। मधुपृषतान् भ्रमराः इव अल्पानपि अस्य गुणकणान् सेवध्वम्।

### अत्याचारस्य विरोधे भाषायाः स्वरूपम्

सान्वयो दुराचारी दुर्योधनः आजीवनं सज्जनानामवमन्ता पाण्डवानां प्रपीडकः छद्मचारी शठश्चास्ते। भगवान् कृष्णः सर्वेषां कल्याणार्थं भीषणयुद्धस्य सर्वक्षयकारिणीं विभीषिकां वारयितुं सन्धिप्रस्तावमेकं नीत्वा दुर्योधनं प्रति गतोऽस्ति। परन्तु कुरुकुलपांसुलः अतिक्रान्तमर्यादः स न केवलं तत्प्रस्तावमधिक्षिपति अपितु तमपि संयन्तुमिच्छति। एतादृशो दुराचारी दुर्योधनः कथमपि क्षन्तव्यो नास्ति। अत एव यदा सूत्रधारः कथयति– **मारिष! ननु सर्वमेवेदानीं प्रतिहतममङ्गलं स्वयं प्रतिपन्नदौत्येन सन्धिकारिणा कंसारिणा।** तथा हि–

**निर्वाणवैरदहनाम प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन।**
**रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः॥**[2]

अत्र सूत्रधारः कथयति यत् रुधिरव्याप्तभूमयः क्षतविग्रहाः कुरुराजपुत्राः स्वर्गस्थाः भवन्तु। तदैव भाषा भीमसुखेन नेपथ्ये साधिक्षेपं साक्रोशं च तर्जयति–

**लाक्षागृहानविषान्नसभाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।**
**आकृष्य पाण्डववधूपरिधानकेशान्स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः॥**[3]

सहदेवस्तं शमयितुं चेष्टते। स 'निर्वाणवैरदहनः...' इति श्लोकस्य कुरुनाशसूचकमर्थं करोति। स कथयति– **'आर्य! मर्षय मर्षय। अनुमतमेव नो भरतपुत्रस्यास्य वचनम्। पश्य। निर्वाणवैरदहना इति यथार्थमेव। सभृत्याः कुरवः क्षत-जालङ्कृतवसुन्धराः क्षतशरीराश्च स्वर्गस्था भवन्त्विति ब्रवीति।'**[4] वचनमिदं श्रुत्वा अरिकुलक्षयोद्यतस्य भीमस्य व्यञ्जनामयी भाषा सोपालम्भं वदति– **'न खलु न खल्वमङ्गलानि चिन्तयितुमर्हन्ति भवन्तः कौरवाणाम्। सन्ध्यास्ते भ्रातरो युष्माकम्।'** अर्थात् भवादृशा जनाः कदापि दुष्टदलनार्थमुद्यता न भविष्यन्ति। नाना-विधकष्टम् अपमानञ्च सोढ्वापि तत्प्रतिकाराय नैवाग्रेसरा भवन्ति अपितु सन्धिं कृत्वा शत्रूणां कल्याणं कामयन्ते।

पुनः अत्र भीमसेनः पृच्छति–**'अथ भगवान् कृष्णः केन पणेन सन्धिं कर्तुं सुयोधनं प्रति प्रहितः।'** सहदेवः कथयति–**'आर्य, पञ्चभिर्ग्रामैः।'** वचनमिदं श्रुत्वा क्षत्रियकुलभूषणो भीमः कर्णौ पिधाय स्फुटं भणति–**'अहह हन्त, देवस्याजात-शत्रोरप्ययमीदृशस्तेजोऽपकर्ष इति यत्सत्यं कम्पितमिव मे हृदयम्। (परिवृत्य स्थित्वा) तद्वत्स, न त्वया कथितं न च मया भीमेन श्रुतम्।'**[5] स सक्रोधं कुरुकुलमुन्मूलयितुं भीषणां प्रतिज्ञां कुर्वन् सहदेवं कथयति–

**'किं नाम पञ्चभिर्ग्रामैः।**

**मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः।**
**संचूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन॥**[6]

श्लोकस्यास्य भाषा मम्मटमपि आकर्षति। स श्लोकमिमं काव्यप्रकाशे काक्वाक्षिप्तध्वनेरुदाहरणरूपेण गृहीतवानस्ति।[7] अत्र किं व्यङ्ग्यं कथं च तस्य काक्वाक्षिप्तत्वमिति विचारणीयम्। अत्र आचार्यः झलकीकरः कथयति–**'वेणीसंहारे प्रथमाङ्के संधिश्रवणकुपितस्य भीमसेनस्य सहदेवं प्रत्युक्तिरियम्। अहं समरे युद्धे कोपात् कौरवाणां दुर्योधनादीनां शतं न मथ्नामि। अत्र प्रतिज्ञातकुरुकुलक्षयस्य भीमसेनस्य 'न मथ्नामि'–इत्युक्तिर्विरुद्धेति नञि काकुः प्रतीयते। प्रतिज्ञातकुरुकुलक्षयस्य भीमसेनस्य 'न मथ्नामि'–इत्याद्युक्तिर्बाधितेति काकुः प्रतीयते तया च काक्वो नञर्थान्तरं प्रतीयमानं**



**'न मथ्नामीति न'–इत्येवं रीत्या प्रकृतनञर्थान्वयीत्यभावाभावरूपं मथ्नाम्येवेत्याद्यवधारणं व्यङ्ग्यम्। काक्वाक्षिप्तं व्यङ्ग्यं वाक्यार्थस्य सिद्धरूपस्य बाधमपाकरोति।'**[8]

**रसोन्मीलने भाषायाः वैशिष्ट्यम्**

भट्टनारायणः रसानुकूलभाषायाः प्रयोगे कुशलः। वीररसो नाटकस्यास्य अङ्गीरसः। नाटके यत्रापि वीररसप्रकाशनस्यावसरः आगतः तत्र भाषा स्वभावत ओजोगुणमयी सञ्जाता अस्ति। ओजश्चित्तस्य विस्ताररूपं दीप्तत्वं कथ्यते। आचार्यमम्मटः कथयति– **'दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।'**[9] आत्माऽत्र चित्तम्। दीप्तिः दीप्तिरूपा या आत्मनश्चित्तस्य विस्तृतिर्विस्तारस्तस्याः हेतुः ओज इत्यर्थः। ओजोगुणव्यञ्जकान् साधनान् वर्णयति आचार्यमम्मटः–

**योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः।**
**टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि॥**[10]

वस्तुतः ओजोगुणान् व्यञ्जकान् वर्णान् वीरमुखात् श्रुत्वा क्लीवोऽपि सिंहायते। सामाजिकस्य चित्तं सहसा प्रदीप्तं भवति। यथा वेणीसंहारनाटके–

**चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य।**
**स्त्यानापविद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः॥**[11]

इति कुरुकुलक्षयोद्यतस्य भीमस्य मुखात् श्रुत्वा अभिनयं वा दृष्ट्वा सामाजिकस्य हृदयमकस्मात् प्रदीप्तं भवति तस्मिन् उत्साहोद्रेकश्च वर्धते। आततायिनं निहन्तुं चित्तं प्रवृत्तमिव प्रतिभाति।

यथा नाटके वीररसस्य परिपाकोऽवलोक्यते तथैव रौद्ररसस्यापि। भीमदुर्योधनयोः क्रोधोद्गारास्तु नाटके श्रूयन्त एव परं रौद्ररसपरिपूर्यमाणा गर्जनाश्च यतस्तत आकर्ण्यन्ते। अश्वत्थाम्न एतस्मिन् वचने रौद्रस्य स्वादो गृह्यताम्–

**यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां**
**यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।**
**यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः**
**क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम्॥**[13]

**कथोपकथने भाषायाः स्वरूपम्**

कथोपकथनस्य भाषा मधुरा गतिशीला पात्रोचिता प्रसङ्गोचिता व्यञ्जनान्विता चास्ते।

एकदा द्रौपदी गान्धार्याः पादवन्दनं कर्तुं गतवती। प्रत्यावर्तनकाले दुर्योधनस्य पत्न्या भानुमत्या सा दृष्टा। अत्र चेटीभीमसेनयोर्मध्ये यो वार्तालापो भवति स परमरमणीयः। यथा हि[14]–

**भीमसेनः–युक्तमेतत्। वन्द्याः खलु गुरवः। ततस्ततः।**

**चेटी– ततः प्रतिनिवर्तमाना भानुमत्या देवी दृष्टा।**

**भीमसेन–(सक्रोधम्) आः, शत्रोर्भार्यया दृष्टा। स्थानं क्रोधस्य देव्याः। ततस्ततः।**

**चेटी–ततस्तया देवीं प्रेक्ष्य सखीजनदत्तदृष्ट्या सगर्वमीषद् विहस्य भणितम्।**

**भीमसेनः–न केवलं दृष्टा उक्ता च। अहो किं कुर्मः। ततस्ततः।**

**चेटी–अयि याज्ञसेनि! पञ्च ग्रामाः प्रार्थ्यन्त इति श्रूयते। तत् कस्मादिदानीमपि ते केशा न संयम्यन्ते।**

**भीमसेनः–सहदेव! श्रुतम्?**

**सहदेवः–आर्य! उचितमेवैतत् तस्याः दुर्योधनकलत्रं हि सा। पश्य–**

**स्त्रीणां हि साहचर्याद् भवन्ति चेतांसि भर्तृसदृशानि।**
**मधुरापि हि मूर्छयते विषविटपसमाश्रिता वल्ली॥**[15]

**भीमसेनः–बुद्धिमतिके! ततो देव्या किमभिहितम्।**

**चेटी–कुमार! यदि परिजनहीना भवेत्तदा देवी भणति।**

**भीमसेनः–किं पुनरभिहितं भवत्या?**

**चेटी–ततो मया भणितम्। अयि भानुमति! युष्माकममुक्तेषु केशहस्तेषु कथमस्माकं देव्याः केशाः संयम्यन्त इति।**

अस्मिन् स्थले नेपथ्यस्य विधानं विधाय भीमस्य क्रोधाग्नेः भीषणतां प्रदर्शयति कविः भीषणैः शब्दैः–

(नेपथ्ये महान् कलकलः। सर्वे सविस्मयमाकर्णयन्ति।)

**भीमसेनः–मन्थायस्तार्णवाम्भः प्लुतकुहरचलमन्दरध्वानधीरः**
**कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।**



**कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवाताः**
**केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्॥**[16]

पुनः भाविघटनायाः व्यञ्जना प्रसादगुणविशिष्टैः स्वल्पैः एवं शब्दैः क्रियते कविना। द्वितीयेऽङ्के कामकेलिलोलुपो दुर्योधनः भानुमतीं स्वोरुयुग्मे स्थातुं कथयति। तदैव कञ्चुकी आगत्य 'भग्नं भग्नम्' इति राजानं व्याहरति। तयोः संलापः[17]–

**कञ्चुकी–देव, भग्नं भग्नम्।**

**(सर्वे सातङ्कं पश्यन्ति)**

**राजा– केन?**

**कञ्चुकी–भीमेन।**

**राजा–कस्य?**

**कञ्चुकी–भवतः।**

**राजा–आः किं प्रलपसि।**

**भानुमती–आर्य! किमनिष्टं मन्त्रयसे।**

**राजा–धिक् प्रलापिन्, वृद्धापसद, कोऽयमद्य ते व्यामोहः।**

**कञ्चुकी–देव, न खलु कश्चिद्व्यामोहः सत्यमेव ब्रवीमि।**

**भग्नं भीमेन भवतो मरुता रथकेतनम्।**
**पतितं किङ्किणीक्वाणबद्धाक्रन्दमिव क्षितौ॥**[18]

अनेन पताकास्थानेन 'भीमेन दुर्योधनस्य उरुद्वयं भग्नम्' इत्यस्याः एव भाविघटनायाः सूचना प्राप्यते।[19]

भगवद्भक्तेरभिव्यञ्जनापि हृदयावर्जकैरेव शब्दैः कृता। भीमः दुर्योधनमधिक्षपन् भगवतः माहात्म्यस्य च प्रतिपादनं करोति–

**आत्मारामा विहितमतयो निर्विकल्पे समाधौ**
**ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः।**
**यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्ता-**
**त्तं मोहान्धः कथमयममुं वेत्तु देवं पुराणम्॥**[20]

एवमेव षष्ठेऽङ्के युधिष्ठिरः कथयति–

कुतस्तस्य विजयादन्यद्यस्य भगवान् पुराणपुरुषो नारायणः स्वयं मङ्गलान्याशास्ते–

**कृतगुरुमहदादिक्षोभसंभूतमूर्तिं गुणिनमुदयनाशस्थानहेतुं प्रजानाम्।**
**अजममरमचिन्त्यं चिन्तयित्वापि न त्वां भवति जगति दुःखी किं पुनर्देव दृष्ट्वा॥[21]**

प्रेक्षकाणाम् अभिनयदर्शनकाले रुचिविवर्धनार्थं समुपयुक्तैः शब्दैः कविना स्वतल-स्पर्शिन्या शेमुष्या विविधा उपाया आविष्कृता नाटकेऽस्मिन्। 'नेपथ्ये' इत नाट्यविधानेन विस्तृता अपि महाभारतीया कथा स्वल्पैरेव शब्दैः उपसंहृता। विधानस्यास्य भूरिशः प्रयोगः कृतः। अनेन कथायां गतिशीलता प्रेक्षकाणां कौतूहलवृद्धिश्च अनायासेनैव सम्पद्यते। एतत्कृते पञ्चसन्धयोऽपि साधु प्रयुक्ताः। षष्ठेऽङ्के कुटिलमतेः चार्वाकमुनेः कल्पना श्लाघ्या। तस्य भाषा प्रपञ्चमयी अस्ति। छद्मचारी स विवेकनिधिं युधिष्ठिरमपि प्रतारयति। दुर्योधनेन भीमः दिवंप्रापितः इति निवेदितं तेनालीकप्रलापिना। युधिष्ठिरः तस्यैव वचनेन अग्निं प्रवेष्टुमद्यतः। प्रेक्षकाणां कौतूहलस्य सीमा नास्ति। एतस्मिन्नेवावसरे नेपथ्ये महान् कोलाहलः श्रूयते। भीमस्य विजयिनी उक्तिः श्रूयते। परन्तु कपटचारिणा मुनिना प्रतारिता युधिष्ठिरादयः तं दुर्योधनं मत्वा भीताः सञ्जायन्ते। परन्तु तत्क्षणमेव दुर्योधनादीनां हन्ता गदापाणिः भीमसेनः प्रविशति। सर्वेषामवसादः सहसा प्रसन्नतामुपैति। भीमः द्रौपद्याः वेणीं बध्नाति। पुनः नेपथ्ये नभस्तलचारिणा सिद्धजनेन तस्याः वेण्याः संहारोऽभिनन्दितः–

**क्रोधान्धैर्यस्य मोक्षात्क्षतनरपतिभिः पाण्डुपुत्रैः कृतानि**
**प्रत्याशं मुक्तकेशान्यतुलभुजबलैः पार्थिवान्तःपुराणि।**
**कृष्णायाः केशपाशः कुपितयमसखो धूमकेतुः कुरूणां**
**सोऽयं बद्धः प्रजानां विरमतु निधनं स्वस्ति राज्ञां कुलेभ्यः॥[22]**

नाटकस्यास्य प्राकृतभाषाऽपि सरला मनोहरा च। नाटकेऽस्मिन् प्रायः शौरसेनीप्राकृतस्य प्रयोगः कृतः। परन्तु तृतीयाङ्कस्यारम्भे मागधीप्राकृतस्यापि प्रयोगो विलोक्यते। निहतानां कौरववीराणां शवसमुदायं दृष्ट्वा सपरितोषं भणति राक्षसी–

**हदमाणुशमंशभोअणे कुम्भाहश्शं वशाहि शंचिए।**
**अणिशं अ पिवामि शोणिअं वलिशशदं शमले हुवीअदु॥[23]**

अर्थात् मारितमनुष्यामिषभक्षणे मेदोभिः सहस्रसंख्यकघटाः एकीकृतं रुधिरं सततं पिबामि। शतं वर्षाणि यावत् संग्रामः जायताम्।

भरतवाक्यस्य श्रुतिसुखदा भाषा सर्वेषां जनानां कृते आह्लादकारिका वर्तते–

**अकृपणमरुक्श्रान्तं जीव्याज्जनः पुरुषायुषं**
**भवतु च भवद्भक्तिर्द्वैतं विना पुरुषोत्तम।**



**दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवित्**
**सततसुकृती भूयाद् भूपः प्रसाधितमण्डलः॥[24]**

उपर्युक्तविवेचनेन स्फुटमिदं यत् महाकवेर्भट्टनारायणस्य नाटकस्य भाषिकी संरचना सुतरां साधुवादार्हा। इष्टार्थप्रकाशने विविधविभावादीनां चित्रणे प्रेक्षकाणां कौतूहलविवर्धने पात्राणां चरितचित्रणे कथोपकथने सहृदयानुरञ्जने अभिनयप्रदर्शननिर्देशे रसोन्मेषे च कवेर्भाषा प्रकामं समर्था।

***

## सन्दर्भाः


1. वेणीसंहारे, 1/5
2. तत्रैव, 1/7
3. तत्रैव, 1/8
4. तत्रैव, पृ.20
5. तत्रैव, पृ.27
6. तत्रैव, 1/15
7. काव्यप्रकाशे, 5/131
8. तत्रैव, पृ.210-211
9. तत्रैव, 8/69
10. तत्रैव, 8/75
11. वेणीसंहारे, 1/21
12. तत्रैव, 2/21
13. तत्रैव, 3/32
14. तत्रैव, पृ.41
15. तत्रैव, 1/20
16. तत्रैव, 1/22
17. तत्रैव, पृ.102
18. तत्रैव, 2/24
19. ध्वन्यालोके, 1/4
20. वेणीसंहारे, 1/23
21. तत्रैव, 6/43
22. तत्रैव, 6/42
23. तत्रैव, 3/1
24. तत्रैव, 6/46


***

# अवसादचिकित्सायां योगस्य भूमिका

डा. खगेन्द्र पात्र

मानवस्य जीवनधारणाय प्रचलितेऽस्मिन् विज्ञानयुगे बहूनि सुखसाधनान्युपलभ्यन्ते। लक्ष्यस्थानीयानि तानि सांसारिकवस्तून्यधिगन्तुं प्रतिमुहूर्तं प्रतियोगिषु स्पर्द्धाऽनुष्ठीयते तदीयचित्तभूमिषु। अनुष्ठीयमानस्पर्द्धाविशेषेषु केचित् सफलकामा भवन्ति। किन्तु विविधप्रतिकूलपरिस्थितिवशात् स्पर्द्धायां योऽसमर्थोऽकृतकार्यो वा भवति सोऽप्रसन्नोऽसन्तुष्टोऽशान्तश्च भवति। बहुकालं धावन् मनस्यनुभूयमानैरेतैः दुःखदभावैः तस्य मानसिकभारसाम्यो विनश्यति। एतेन मनसि समुत्पद्यते सन्तापो यस्त्ववसादं जनयन् कालक्रमं हृद्घातादिव्याधिभिः प्राणान् हरति। अतो विद्वद्भिः साधूक्तम्-

**सन्तापाद् भ्रश्यते रूपं सन्तापाद् भ्रश्यते बलम्।**
**सन्तापाद् भ्रश्यते ज्ञानं सन्तापाद् व्याधिमृच्छति॥**

वस्तुतोऽवसादो न केवलं सर्वविधविकासस्य प्रतिबन्धको भवत्यपि तु मानसिकशारीरिकरोगयोः मुख्य उत्स इत्याधुनिकचिकित्सातत्त्वज्ञानामभिमतम्। तदनुसारमवसादः सकलसमस्यायाः केन्द्रबिन्दुः इति केचन विद्वांसः कथयन्ति। अस्य कारणमिदं यद् यदि कश्चिदवसादग्रस्तो भवति, तर्हि तस्यात्मविश्वासः क्षीणो भवति। आत्मविश्वासरहितजनो भयातुरः शङ्काकुलः संशयात्मा च भवति। **'संशयात्मा विनश्यती'**ति गीतोक्तसिद्धान्तानुसारं तस्य भयातुरजनस्य रोगनिवारकशक्तिः क्षीयते। कालक्रमेण स दुर्बलमस्तिष्कः सन् किमपि विकासमूलकं कर्म सम्पादयितुमनिच्छुकोऽसमर्थश्च भवति। यो दीर्घकालमवसादग्रस्तो भवति, स आत्मानं मूल्यहीनं परित्यक्तं वेति मत्वा परिशेषे आत्महत्यायै प्रवृत्तो भवति। एवं क्रमेणावसादग्रस्तजनो दुर्बलमना रुग्णः स्वल्पायुश्च भूत्वा विनाशमधिगच्छति। संक्षेपेणेदमेव वक्तुं शक्यते यदवसादोऽन्तारिपुरिव सकलविकासमार्गमवरुध्य व्यक्तिं विनाशमार्गमभित आकर्षति। एतेन समग्रजीवनकालो दुःखमयो भवति। अत आत्मविकासाय स्वास्थ्यरक्षायै चावसादस्य मूलोत्पाटनमवश्यं कर्त्तव्यम्।



अनुसन्धानादिदमेवावगम्यते यद् एलोपाथीयहोमिओपाथीयायुर्वेदीयादिचिकित्सा-विधानानुसारमवसादस्य निराकरणाय याः काश्चन पद्धतयः प्रयुज्यन्ते, ताः न पर्याप्ताः। अत आधुनिकचिकित्सातत्त्वज्ञाः योगविज्ञानं विकल्पचिकित्सासाधनरूपेण स्वीकुर्वन्ति। वस्तुतः पातञ्जलयोगदर्शनादिसंस्कृतशास्त्रेष्ववसादनिराकरणाय पर्याप्ता उपायाः समुपलभ्यन्ते। सुतरामाधुनिकचिकित्साव्यवस्थायाः परिपुष्टये **अवसादचिकित्सायां योगस्य भूमिकेति** विषये पातञ्जलयोगदर्शनमाधारीकृत्य संक्षेपेणात्रालोच्यते।

### अवसादस्य स्वरूपम्

व्युत्पत्तिदृष्ट्यावसादस्य स्वरूपमधोगतिः विनाशप्रक्रिया वेति ज्ञायते। 'अव' उपसर्गपूर्वकं 'सद्' धातोः 'घञ्' प्रत्ययाद् अवसादेति शब्दो निष्पद्यते। 'सद्' धातोः विनाशगति-अवसादनेति त्रिविधा अर्थाः सन्ति। अत उक्तम् -'षद्लृ (सद्) विशरणगत्यवसादनेषु।' नीचार्थक-अव-उपसर्गेण सह 'सद्' धातोः संयोगेनावसादेति शब्दोऽधोगतिं सूचयति। इयमधोगतिः मनसि शरीरे च यथाक्रमम् अवसन्नता क्लान्तिश्चेति दुःखदसत्तारूपाभ्यामनुभूयते। अवसन्नतेति पदेनोदासीनता क्लान्तिरुत्साहहीनता स्फूर्तिरहितावस्था चावगम्यन्ते।

अवसादरोगोऽधोगत्यवस्थां विसृज्य विवधरूपैः व्यक्तेः समाजस्य च विनाशं करोति। अवसादस्यापरं नाम विषादः। आकस्मिकप्रतिकूलपरिस्थित्या यदा मनुष्यस्य मन आहतप्रायं भवति, तदा तस्य मनसि दुश्चिन्तायाः तरङ्गः समुत्पद्यते। दुश्चिन्तेयं यदि बहुकालं यावदनुभूयते, तर्हि मनः क्लान्तमवसन्नं वेति भवति। अयमवसन्नभावोऽवसादस्य स्वरूपमेव। मानसिक्यवसन्नता समग्रस्नायुमण्डले उत्तेजनामुत्पाद्य शरीरमपि क्लान्तं निष्प्रभं च करोति। शरीरे यदावसादः सञ्चरति तदा शरीरं शिथिलं भवति। अपि च हृदयस्पन्दनगतिः श्वासगतिश्च विकृते भवतः। तस्मात् स्नायविकदौर्बल्यमुपजायते।[1]

मानसिकचिकित्साविज्ञानानुसारमवसादो हि मानसिकरोगः। अतो मनुष्यस्य मनस्य-नुशोचनात्मग्लानि-नैराश्य-हतोत्साहासहायबोधापमानित-मतिभ्रमभयाशङ्कापराधबोधा-दिरूपैरवसादस्य स्वरूपं परिलक्ष्यते।

### अवसादस्य लक्षणम्

अवसादस्य लक्षणं विवधरूपैः शरीरे मनसि च परिलक्ष्यते। अवसादग्रस्तव्यक्तेः मनसि भयम् उत्कण्ठा च वर्द्धेते। यथाकालं सुखनिद्रा नानुभूयते। द्वन्द्वभावस्य प्रधान्यात् कर्त्तव्याकर्त्तव्यनिर्णयव्यापारे रोगी अनिश्चितभावमनुभवति।

भोजनेऽरुचिरनुभूयते। अरुचिवशाद् व्यक्तिः कदाऽर्द्धाहारेण कदा वाऽनाहारेण जीवनमतिवाहयति। भोजनह्रासात् स क्षीणकायो भवति। उद्वेगवशाच्छरीरान्मात्राधिकं

स्वेदनिर्गमनमपि भवति। निरन्तरदुश्चिन्तावशात्तेन कोष्ठकाठिन्यमनुभूयते। पुनरवसादवशादात्मानमन्येभ्योऽक्षमो हीनो वा विचार्य स ईर्ष्यापरायणः क्रुद्धश्च भवति। लक्ष्यविषयकस्वकर्मण्यसफलतामाधारीकृत्य स आत्मानमपमानितमिति विचारयति।

'जातस्य हि ध्रुवो मृत्यु'रिति सृष्टिगतनियमात् साधारणव्यक्तिः मृत्योरनिवार्यतां विज्ञाय कस्यचिदात्मीयस्य विच्छेदेनानुभूतं दुःखं विस्मरति। किन्त्ववसादग्रस्तव्यक्तिरात्मीयजनस्य वियोगेन तामेव मृतव्यक्तिं निरन्तरं स्मृत्वाधिकतरं नैराश्यमसहायताञ्चानुभवति। तस्मात् कारणात् सः केनापि सह मित्रतां कर्तुं पराङ्मुखो भवति। पुनश्चात्मनो वृत्तिगतकर्मण्यात्मीयजनेषु चोदासीनो भवति। कदा व्यक्तिरभिमानहेतुकक्रोधात्मपीडनभावान् व्यवहारेण प्रकटयति। स आत्मानं मूल्यहीनमपमानितञ्चेति मत्वाऽऽत्महत्यां कर्तुं चेष्टते।

**अवसादस्य कारणानि**

वयोदृष्ट्या लिङ्गदृष्ट्या चावसादस्य बहूनि कारणानि सन्ति। तेषु कतिपयान्यत्र संक्षेपेणोपस्थाप्यन्ते। तद्यथा-

1. प्रियजनस्य मृत्युः।
2. आत्मीयजनेभ्यो विच्छिन्नः सन् यदि काचिद् व्यक्तिः दूरवर्त्तिस्थानमधिवसति।
3. वृत्तिक्षेत्रे परिवारे वा यद्यशान्तिप्रदपरिस्थितिः निरन्तरमनुभूयते।
4. यदि काचिदनूढा युवती केनचिद् दुर्जनेन धर्षिता भवति।
5. यदि कश्चिन्निष्कपटजनः केनचित् कपटमित्रेण विश्वासघातवशात् प्रवञ्चितो भवति।
6. बहुकालं यावद् यदि कश्चिद् जनः व्याधिप्रपीडितो भवति।

अवसादस्य कारणप्रसङ्गे योगदर्शनं भिन्नरूपेण तथ्यमुपस्थापयति। तदनुसारमवसादस्य मुख्यं कारणं खलु चित्तस्य विक्षिप्तावस्था। महर्षिपतञ्जलिमहोदयेन यद्यपि नामतोऽवसादरोगस्य प्रसङ्गे न किमप्युक्तम्, तथापि तेन चित्तविक्षेपस्य कारणनिरूपणमाधारीकृत्य योगदर्शने व्याधि-संशय-प्रमादालस्य-भ्रान्तिदर्शनादयो ये अभावात्मिकाः मानसिकवृत्तय उल्लिखिताः, ता एव चित्तं विक्षिपन्ति। तस्मादेव ता हानिकारकवृत्तयोऽवसादस्य निदानस्थानीयाः भवन्ति।[2]

चित्तस्य विक्षिप्तावस्थायै यानि कारणस्थानीयानि तत्त्वानि सन्ति तान्येव चित्तवृत्तिनिरोधव्यापारेऽन्तरायाः विघ्नस्वरूपा इत्यवगन्तव्याः। अस्मिन् प्रसङ्गे पतञ्जलिनोक्तं यदवसादस्य निदानस्थानीयाः खलु दुःखदौर्मनस्यादयः।[3] अत्र दुःखस्यापरं नाम क्लेश इत्यवगन्तव्यम्। क्लिश्नाति चित्तं शरीरञ्चेति क्लेशः। पुनश्च क्लेशस्य कारणान्यनेकानि सन्ति। अतः क्लेशनिरूपणप्रसङ्गे पतञ्जलिनोक्तं यदविद्याहङ्कारद्वेषादयो मनसि शरीरे च



क्लेशं जनयन्ति।[4] अविद्याया अपरं नाम विपरीतज्ञानम्। वेदान्तदर्शनस्य सिद्धान्तानुसारमित्थं वक्तुं शक्यते यदतस्मिन् तद्बुद्धिरविद्येति। अर्थाद् यस्य वस्तुनः यो गुणो धर्मो वा नास्ति, तस्मिन् वस्तुनि स धर्मोऽस्तीति मिथ्यास्वीकृतिरेवाविद्या।

यथा- यद्यपि कपटभावसम्पन्नमित्रस्य मनसि सत्यधर्मः हितकारिभावश्च न विद्यते, तथाप्यविद्यावशान्निर्बोधो जनः यदा तस्मिन् कपटमित्रे विश्वासं करोति, आत्मानं तस्मिन्नुन्मोचयति वा, तदा स कालक्रमेण कपटमित्रेण प्रतारितः सन् क्लेशमनुभवति। प्रसङ्गेऽस्मिन् पतञ्जलिपादैरुक्तं यदनित्याशुचिदुःखादिषु वस्तुषु यथाक्रमं नित्यशुचिसुखादिभावानां स्वीकृतिरेवाविद्येति।[5] अनेन भ्रान्तिपूर्णकार्येण मनुष्यः दुःखमनुभवति। पुनश्च दुःखमेव चित्तमवसादमयं करोति। सुतरामवसादनिराकरणाय यथोचितचिकित्सा कर्त्तव्येति।

**अवसादचिकित्सापद्धतयः**

येभ्यः कारणेभ्योऽवसादरोगः समुत्पद्यते तेषां मूलोत्पाटनाय पतञ्जलिपादैः योगदर्शने कतिपयपद्धतय उल्लिखिताः। तेषु मुख्या उपाया अत्रोपस्थाप्यन्ते।

अवसादो मनसः रोग इति कृत्वावसादचिकित्सा मुख्यतो मनसि कर्त्तव्या। योगदर्शनानुसारं मनसः चित्तस्य वा क्षिप्तावस्थैवावसादस्य हेतुस्थानीया। अतः चित्तं यथा शान्तं भवेत्तदनुसारमुचितोपचारः कर्त्तव्यः।

क्षिप्तावस्थाया अपरं नाम चित्तस्य गुरुतरास्थिरावस्थेति प्रागेव सूचिता। इयमस्थिरावस्था मनसो बहिर्मुखीभावादुपजायते। यदा मनसि रजोगुणस्य तमोगुणस्य च मात्रातिशयो वर्द्धते, तदा चित्तं बहिर्मुखं भवति। इदं बहिर्मुखं मनः इन्द्रियभोग्यविषयेष्वासक्तं भवति।

वस्तुतो मनः विना इन्द्रियाणि स्वस्वविषयान् भोक्तुमसमर्थानि भवन्ति। अत आवश्यकतानुसारं मनो विषयेषु यथोचितं संयुक्तं भवेत्। किन्तु विषयैः सह मात्राधिकसंयोग उच्छृङ्खलसंयोगो वा मनस्यस्थिरतां वर्द्धयति। वृद्धिमधिगतेयमस्थिरता यदि दीर्घकालं मनसि तिष्ठति, तर्हि मनः क्लान्तमवसन्नं वेति भवति। मनस इयमवसन्नतैवावसादः।

एतेनावगम्यते यच्चित्तस्यानियन्त्रितावस्था चित्तमवसादयति। अतोऽवसादस्य चिकित्सायै चित्तगतवृत्तीनां नियन्त्रणम् (निरोधः) आवश्यकम्। इयं चित्तवृत्तिनिरोधप्रक्रियैव योगः। अतः पतञ्जलिना चित्तवृत्तीनां नियन्त्रणमाध्यमेनावसादनिराकरणाय यथार्थत उक्तम् ''योगश्चित्तवृत्तिनिरोधः।''[6] चित्तवृत्तिनिरोधाय तेन योगदर्शने यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधय इति येऽष्टसोपानात्मका उपाया निर्दिष्टाः त एवावसादचिकित्सायै परमसहायका इति वक्तुं शक्यते। एतेषु कतिपयाः मुख्या उपायाः प्रसङ्गानुसारमत्रोपस्थाप्यन्ते।

### 1. ईश्वरप्रणिधानेनावसादचिकित्सा

परिवारे वृत्तिगतकर्मक्षेत्रे वाऽत्यधिककार्यभाराद् भयसन्देहाद्यभावात्मकभावाच्च मनस्युत्पद्यते सन्तापः। यदि दीर्घकालं यावदयं सन्तापो मनः प्रदेशं प्रदहति, तर्हि तदेव मनोऽवसन्नं क्लान्तं वा भवति। एतेनावगम्यते यद् भयाद्यभावात्मकप्रवृत्तयोऽवसादस्योत्पत्तये प्रमुखकारणानि। अतोऽवसादचिकित्सायै कारणानामेषां निराकरणं प्रथमकर्त्तव्यम्। अस्मिन् प्रसङ्ग ईश्वरप्रणिधानमव्यर्थसाधनमिति विज्ञाय पतञ्जलिना योगदर्शन उक्तं यद् सर्वशक्तिमयस्येश्वरस्य दिव्यशक्तिमधिगन्तुं प्रारभते। तेन च तदेव मनो निर्भीकं भवति।

**ईश्वरप्रणिधानात् कथं मनो निर्भीकं भवतीति जिज्ञासायामुच्यते-** 'प्र' + 'नि' इत्युपसर्गपूर्वकाद् धारणार्थकाद् 'धा' धातोः 'ल्युट्' प्रत्यये प्रणिधानमिति पदं निष्पन्नम्। अस्यायमर्थो यत् प्रकृष्टं सुदृढं वा धारणमिति। सुतराम् 'ईश्वरप्रणिधानम्' इत्यनेनाविरतमात्मनि (मनोवचनकर्मसु) ईश्वरीयभावस्यावधारणमीश्वरमभितश्चात्मनोऽवस्थानमित्यवधेयम्।[7] अस्मादवगम्यते यदीश्वरस्य समीपेऽवस्थानमेवेश्वरप्रणिधानम्। ईश्वरप्रणिधानप्रक्रियावसरे साधक ईश्वरार्पितबुद्ध्येत्थं परिकल्पयति- 'श्वासक्रियावसरेपीश्वरः प्राणशक्तिरूपेण मम हृदयं प्रविश्य निरन्तरं मामवलोकयति; मम वचनञ्च शृणोति। एतेनाहमीश्वरीयशक्तिसम्पन्नो भवामि।' अनेन प्रकारेण साधको यदि सर्वशक्तिमयेश्वरस्य दिव्यसत्तामात्मन्यावाहयति तदा तस्मिन्नम्लजानरूपेणेश्वरीयशक्तिः सञ्चरति। ईश्वरीयशक्त्याः प्रभावात् सोऽविद्यास्मिता-राग-द्वेषाभिनिवेशशून्यो भवति। वस्तुत ईश्वरस्य स्वरूपप्रसङ्गे पतञ्जलिनोक्तम् -''क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।''[8] अविद्यास्मितारागद्वेषाभिनिवेशाः''[9] पञ्च क्लेशा अवसादरोगं जनयन्ति, तेषामभावादवसादस्योपशमो भवति। अतोऽवसादरोगस्य चिकित्सायामीश्वरप्रणिधानस्य भूमिका महत्त्वपूर्णेत्यवधेयम्।

### 2. प्रणवोपासनयावसादचिकित्सा

ईश्वरप्रणिधानप्रक्रियावसरे प्रणवस्योपादेयतामनुभूय पतञ्जलिनोक्तं यदीश्वरस्य संक्षिप्तं नाम प्रणवः।[10] ॐ काररूपस्यास्य प्रणवस्य निरन्तरमुच्चारणं ध्यानावसरे मानसिकपीडामुपशमयति। अत ईश्वरीयध्यानाय ॐकारस्य जपः क्रियते। अस्याः प्रक्रियायाः नाम प्रणवोपासना। भ्रामरीप्राणायामावसरे ॐकारस्य मधुरमुच्चारणमवसन्नं मनः प्रसादमयं करोति।

ॐकारस्योच्चारणमवसादनिराकरणाय तदा सार्थकं भवति यदा प्राणायामेन सह 'सोऽहमि'त्यस्य तत्त्वार्थः साधकस्य मनसि क्रियाशीलो भवति। प्राणायामप्रक्रियायां यदा श्वासस्य ग्रहणं क्रियते, तदा 'सो' इति ध्वनिः सूक्ष्मरूपेणोत्पद्यते। 'सो' इत्यस्य तत्त्वार्थः



ईश्वरः। अतः श्वासग्रहणावसरे सर्वशक्तिमानीश्वरः 'सो' इति ध्वनिना सह साधकस्य शरीराभ्यन्तरमम्लजानरूपेण प्रविशतीति परिकल्पना क्रियते। अनन्तरं श्वासत्यागसमये 'हम्' इति ध्वनिरुत्पद्यते। एतेनावगन्तव्यं यदनेन ध्वनिना सह शरीराभ्यन्तरस्थमङ्गाराम्लजानम् अहङ्कार-भय-क्रोधादिदूषिततत्त्वानि च बहिर्गच्छन्तीति विचारः कर्त्तव्यः। सोऽहमित्यस्य साधनावसरेऽहंकाराभिमाने च निराकृते 'अयमात्मा ब्रह्म', 'अहं तस्याः दिव्यशक्त्या अंशोऽस्मि' चेति दिव्यज्ञानस्योदयो भवति। आत्मनि ईश्वरीयशक्तेः सञ्चारेण चित्तं शुद्धं भवति। तस्माच्च भयसन्देहाद्यभावात्मकदुर्बलभावाः अपसार्यन्ते। दूरीकृते भयादिव्याधिकारणेऽवसादस्योपशमो भवति।

### 3. प्राणायामेनावसादनिराकरणम्

योगदर्शनानुसारमविद्यादयो ये क्लेशाः चित्तमशुद्धं कुर्वन्ति, तेषां निराकरणे प्राणायामस्य महत्त्वपूर्णा भूमिका विद्यते। अतः पतञ्जलिनोक्तं यत्प्राणायामस्याभ्यासेन प्रकाशावरकरूपाया अविद्याया आवरणं (विवेकज्ञानस्याच्छादनम्) क्षीयते।[11] एतेनात्मनि विवेकज्ञानस्योदयो भवति। विवेकज्ञानेनात्मविश्वासो नाम आत्मशक्तिः वर्द्धते। अनयात्मशक्त्या भयादीनामवसानमवसादविनाशश्च जायते।

### 4. सन्तोषेणावसादचिकित्सा

असन्तोषभावो यथाक्रमं क्रोधस्य मानसिकदुश्चिन्ताया अवसादस्य चान्यतम उत्स इति सततमनुभूयते। अयमभावात्मकभावः चित्ते क्षोभमुत्पाद्य शरीरस्थप्राणमयकोष-मस्थिरं करोति। एतेन शरीराभ्यन्तरे प्राणाः द्रुतगत्या प्रवहन्ति। प्राणानां द्रुतप्रवाहः खलु स्नायुमण्डलमुत्तेजयति। एतेन हृत्पिण्डपाकयन्त्रादिषु विकृतिः जायते। अनेन प्रकारेण सन्तोषाभावः कालक्रमं शरीरं रुग्णं करोति तस्माच्च मनोऽवसन्नं भवति। वस्तुतोऽसन्तुष्टं मनोऽवसादस्य कारणं भूत्वा परोक्षेणात्मविकासमार्गे विघ्नं सृजति। अतोऽवसादस्योपशमनाय पतञ्जलिपादैः सन्तोषभावं समुचितसाधनमित्युद्घोषितम्।[12]

### 5. प्रत्याहारेणावसादनिराकरणम्

एकस्मिन् समये विविधविषयैः सह चित्तसंयोगान्मनो निरन्तरं बहिर्मुखं भवति। तेन मानसिकास्थिरता जायते। यदि दीर्घकालं यावदियमस्थिरता तिष्ठेत्तर्हि मनोऽवसादग्रस्तं भवति। अतोऽवसादस्योपशमनाय इन्द्रियाणि स्वस्वविषयेभ्यः प्रत्याहर्त्तव्यानि। एतेन बहिर्मुखं मनोऽन्तर्मुखं भवति। अस्मिन्नवसरे ईश्वरोपासनया चित्तमीश्वरीयगुणैः संयुक्तं भवेत्। तेनात्मविश्वासः सुदृढो भवति। आत्मविश्वासः मनोबलं द्विगुणितं कृत्वा चित्तं प्रसादयति। पुनश्च प्रत्याहारप्रक्रिया चित्तवृत्तिनियन्त्रणाय सहायिका भवति। यदा चित्तवृत्तयो

नियन्त्रिताः संयता वा भवन्ति तदा चित्तं स्थिरं प्रसन्नञ्च भवति। एतेनावसादस्योपशमनं भवति। प्रत्याहारप्रक्रिया भवतीति कृत्वा पतञ्जलिना प्रत्याहारविधिं निरूप्योक्तम्-

**'स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः।'**

(पात.योगसूत्रम् -2/54)

### 6. प्रसादेनावसादचिकित्सा

अवसादपीडितो जनः प्रसादस्यास्वादनाय सततमिच्छति, यतो हि प्रसन्नतावसादस्य समुचितोपचारसाधनमिति विदुषामभिमतम्। किन्तु विडम्बनेयं यदवसादाक्रान्तो जनः मानसिकभारसाम्याभावाद् वाचाल इव व्यवहरति। आत्मीयैः प्रतिवेशिभिश्च सह कथोपकथनावसरेषु मतपार्थक्यवशाद् यदि भावगतसंघर्षो जायते, तर्हि स आत्मानमपमानितं मूल्यहीनमवाञ्छितमनादृताहतप्रायं मूल्यहीनञ्चैवानुभवति। तस्य मनसि भयाशङ्केर्ष्यासूया-घृणाद्वेषपरनिन्दादयः चित्तविक्षेपकारकाः यदि मानसिकमलाः बहुकालाद् विद्यन्ते, तर्हि व्यवहारगतप्रतिकूलपरिस्थित्या सोऽकस्मादेवाहतः सन्नात्मघातक इवाचरति। तस्य तादृशमानसिकमलानां परिमार्जनेन चित्तं निर्मलं प्रसन्नञ्च भवति। एतदर्थं किं कर्त्तव्यमिति जिज्ञासायां पतञ्जलिना चित्तप्रसन्नकारकं योगसूत्रं प्रणीतम्। तदनुसारं जिज्ञासुसाधक आत्मन ईर्ष्यासूयाद्वेषतुल्यमानसिकमलानामपसारणायाधोविधः प्रसादजनको व्यवहारोऽनुसरणीयः।

**( क ) ईर्ष्यानिराकरणव्यवहारः-** ईर्ष्या चित्तदर्पणं मलिनं करोति। अस्य व्यावहारिकता समाजे परिलक्ष्यते। कस्यचिदपरस्य धनगुणयशआदिसमृद्धावस्थामवलोक्य यस्य मनस्यग्निरिव ज्वाला समुत्पद्यते स ईर्ष्याकातरः सन्नतीव क्रोधजर्जरितो भवति। अस्मान्नभावात्मकभावात्तस्य मनस्यहं पतितो वेति विचारः समुत्पद्यते। तस्मात् सोऽवसन्नो भवति। एतादृशचित्तगतमालिन्यस्य परिमार्जनाय कमपि सुखसमृद्धं जनं दृष्ट्वा तेन सह मित्रतापूर्णव्यवहारं कृत्वा प्रसन्नो भवेत्। वस्तुतोऽपरस्य मित्रस्य सुखमात्मनः सुखमिति विचारेणेर्ष्यामलो विनश्यति। मित्रताया औषधीयमूल्यमनुभूय ऋषिभिः यजुर्वेदे साधूक्तम्- ''मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामबे।''(य.36/18)

**( ख ) असूयानिराकरणव्यवहारः-** कस्यचिदपरस्योन्नतिमवलोक्य यद्यसहिष्णुभावो मनस्युत्पद्यते तर्हि दुष्टव्यक्तिरुन्नतव्यक्तेरनिष्टसाधनाय गुणेषु दोषारोपं करोति। गुणेष्विदं दोषारोपणकार्यमसूयेत्युच्यते। अयमसूयाभावः चित्तमवसादयति। अतोऽवसादचिकित्सायै असूयानिष्कासनमावश्यकम्। एतदर्थं कमपि पुण्यात्मानं जनमवलोक्य मनसि प्रसन्नतामावाहयेत्। अपि च तस्य महात्मनो गुणस्य प्रशंसा कर्त्तव्या। एतेन स्वमनसोऽसूयाभावो विनश्यति।

**( ग ) द्वेषनिराकरणव्यवहारः-** यदि कश्चिद् दुष्टजनोऽस्माकमनिष्टं करोति,



तर्हि तं प्रति मनसि न केवलं द्वेषभावः समुत्पद्यते, अपि तु तमेव दुर्जनं दण्डयितुमस्माकं मनसि प्रतिहिंसाभाव उपजायते। एतेन चित्तं प्रकुपितं भवति। दीर्घकालं यद्येतादृशद्वेषो मनसि पीडामुत्पादयेत्तर्हि मनोऽवसन्नं भवति। अत एतादृशद्वेषस्य निराकरणाय पापात्मानं दृष्ट्वा तस्योपेक्षा कर्त्तव्येति पतञ्जलिपादैरुक्तम्।

एवं क्रमेण मैत्री-करणमुदितोपेक्षापूर्णपात्रोचितव्यवहारैः यथाक्रमम् ईर्ष्या-घृणाऽसूयाद्वेषतुल्यचित्तगतमलानां परिमार्जनाच्चित्तं प्रसन्नं भवति।[13] चित्ते प्रसन्नतायाः प्रसादस्य वावस्थानेनावसादस्योपशमनं भवति।

एवं क्रमेण योगपद्धत्यावसादस्य चिकित्सा कर्त्तव्या। एतेन मानसिकस्वास्थ्यस्य शारीरिकस्वास्थ्यस्य च सुरक्षा भवति।

## सन्दर्भाः

1. भगवद्गीतायामवसादग्रस्तस्यार्जुनस्यावस्था इत्थं वर्णितमस्ति-
   सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
   वेपथुश्च शरीरे मे रोमहर्षश्च जायते।
   गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।
   न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः।। गीता 1/29, 30
2. व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शना-
   लब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः।। पातञ्जलयोगसूत्रम् 1/30
3. दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः। पातञ्जलयोगसूत्रम् 1/31
4. अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः। पातञ्जलयोगसूत्रम् 2/3
5. अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या। पातञ्जलयोगसूत्रम् 1/5
6. पातञ्जलयोगसूत्रम् 1/5
7. ईश्वरप्रणिधानाद्वा। पातञ्जलयोगसूत्रम् 1/23
8. पातञ्जलयोगसूत्रम् 1/24
9. अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः। पातञ्जलयोगसूत्रम् 2/3
10. तस्य वाचकः प्रणवः। पातञ्जलयोगसूत्रम् 1/27
11. ततः क्षीयते प्रकाशावरणम्। पातञ्जलयोगसूत्रम् 3/52
12. सन्तोषादनुत्तमसुखलाभः। पातञ्जलयोगसूत्रम् 2/42
13. मैत्रीकरणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्।
    पातञ्जलयोगसूत्रम् 1/33

***

# महाभाष्यगतसामाजिकोदाहरणानां काशिकायां व्याप्तिवैशिष्ट्यम्

**प्रतिभा आर्या**

साहित्यं नाम समाजस्य दर्पणमिति आभाणकं चरितार्थीकुर्वन्ति तात्कालिका ग्रन्थाः। यतः स्वाभाविकोऽयं सिद्धान्तः यत् तत्कालव्यवहारप्रतिबिम्बं सामाजिकानां लौकिकेष्वाचारेष्ववतरति तर्हि विशिष्टग्रन्थप्रणयितृव्यवहारेषु का कथा? महाभाष्यकारसमये भारतवर्षस्य का दशा आसीत्, तदानींतनानां मनुष्याणां लौकिकव्यवहारः कथमासीत्, कृष्यादिकं कीदृशमासीत्, शिक्षण-भोज्यपदार्थधार्मिकाचरणानि कथमासन् तेषाम्। अस्य ज्ञानं महाभाष्यप्रदत्तोदाहरणादिना स्पष्टमवगम्यते। महाभाष्यकालीनसंस्कृतेः सामाजिक-व्यवहारस्य च कीदृशं परिवर्त्तनं परिवर्द्धनं ह्रासः काशिकाकालीनसमाजे सञ्जातमिति ग्रन्थद्वयानामध्ययनपुरस्सरम् अनुमातुं शक्यते। ग्रन्थद्वये तदानींतनानां लोकाचाराः, भोज्यपानम्, नारीणां सामाजिकार्थिकशैक्षणिकजीवनम्, छात्रजीवनम्, शिक्षणसंस्थाः, धार्मिककृत्यानि वर्णितानि।

**लोकाचारेषु–** भाष्यकारेण निपात एकाजनाङ्[1] सूत्रे ''ओदकान्तं प्रियं पान्थमनुव्रज'' इत्युक्तम्। न्यासकारोऽत्र प्राह– ''ओदकान्तात् प्रियं पान्थमनुव्रजेत् य एव प्रथमो उदकान्तश्च ततोऽनुव्रजति।''[2] अभिज्ञानशाकुन्तलेऽपि प्रयोगोऽयं लभते–''ओदकान्तं स्निग्धो जनोऽनुगम्यत''[3] इति। स्नेहिजनैः जलाशयपर्यन्तम् अनुसरणं कर्त्तव्यमिति लोकाचारः आसीत्। साम्प्रतमपि बान्धवाः सम्बन्धिनां गमनकाले जलपर्यन्तं त्यक्तुं गच्छन्ति येन स्नेहातिशयभावनाऽपि दृश्यते।

**शिष्टाचारः–** काशिकायां शिष्टजनानां व्यवहारादिविषये उदाहरणं दृश्यते यथा यः उपाध्यायेन यथायोग्यव्यवहारं न करोति सः निन्दनीयः भवति। यथोक्तं– ''स्वयं ह रथेन याति उपाध्यायं पदातिं गमयति''[4], यः शिष्यः उपाध्यायं पदातिं गमयति स्वयं तु वाहनेन रथेन याति एषा क्रिया गर्हा वर्त्तते। तथा च– ''स्वयं ह्यौदनं भुङ्क्ते



उपाध्यायं सक्तून् पाययति''[5] ओदनभोजनं सम्मानसूचकमासीत् तदानीं, परम् उपाध्यायाय ओदनं न दत्त्वा सक्तून् पाययति– एष आचारः निन्दनीयः वर्त्तते इति। भाष्यकारेण शिष्टाचारेषु ब्राह्मणवृषलानां नावावतरणकाले पूर्वं ब्राह्मणः तरति तावत्कालं वृषलः प्रतीक्षारतः भवति इत्युक्तम्। यथा– ''ब्राह्मणेषु तरत्सु वृषला आसते।''[6] पतञ्जलिना शिष्टानुमोदितानि प्रमाणानि सदैव विनैव विचार्य स्वीकर्त्तव्यानि इत्युक्तम्– यथोक्तं– ''स चावश्यं शिष्टप्रयोग उपास्यः।''[7]

**नारी–** नारीणां सामाजिकस्थितिः उन्नता आसीत्। परं दासीनां स्थितिः समाजे शोभना नासीत्। ताः स्वामिनां सेवां शुश्रूषां कुर्वत्यः तत्रैव जीवनं यापयन्ति, कदापि स्वामिनः अपमानमपि सहन्ते, तेषामशिष्टाचरणं महाभाष्ये ''संयच्छते''[8] इति प्रयोगेण प्रदर्शितः ग्रन्थकारेण। काशिकाकालपर्यन्तं तु दासीनां वृषलीनां स्थितिः ग्रामपुत्राणां कामतृप्तये साधनत्वेन सञ्जाता। यथोक्तं– ''तिष्ठते वृषली ग्रामपुत्रेभ्यः।''[9] प्रकाशयत्यात्मान-मित्यर्थः।

भाष्यकारेण पुत्रोत्पत्तिसमये हर्षोल्लासस्य दशसहस्रगवां दानस्य च वर्णनं कृतम्– ''यस्मिन् दश सहस्राणि पुत्रे जाते गवां ददौ।''[10]

काशिकाकारस्तु कन्योत्पत्तिसमये पारिवारिकजनाः शोकं कुर्वन्ति इति वर्णयति– ''कन्यया शोकः''[11], ''शोककरी कन्या''[12] इत्युदाहरणद्वयं काशिकाकालीनसमाजस्य कन्याः प्रति मनोदशां प्रदर्शयति। यत्र शोकस्य कारणभूता कन्या मन्यते।

पतञ्जलिकाले स्त्रीषु शिक्षाप्रसारः आसीत्। महाभाष्ये वर्णिका–आचार्यायाः वर्णनमस्ति। वर्णिका–भागुरी लोकायतस्य इति। आपिशलग्रन्थमधीयाना 'ब्राह्मणी तथा काशकृत्स्नग्रन्थ-मधीयाना ब्राह्मणी वर्णिता, यथोक्तं– ''आपिशलमधीते ब्राह्मणी आपिशला ब्राह्मणी। काशकृत्स्नमधीते काशकृत्स्ना ब्राह्मणी।''[13] काशिकाकारेण पाणिनिग्रन्थाध्ययनं कुर्वतीं ब्राह्मणीं ''पाणिनीया ब्राह्मणी''[14] इति कथिता। तथा यस्य वैयाकरणी भार्या वर्त्तते तस्य कृते प्रयोगः–''वैयाकरणी भार्या अस्य वैयाकरणभार्य''[15] इति। एतानि महाभाष्यगतकाशिका-गतप्रदत्तोदाहरणानि तदानीन्तनानां कन्यानां व्याकरणाध्ययनं शास्त्राध्ययनं च पुष्णाति।

पतञ्जलिकाले विप्रतिषेधसूत्रे 'अस्ति प्राधान्ये वर्त्तते' तद्यथा– ''परमियं ब्राह्मण्यस्मिन् कुटुम्बे, प्रधानमिति गम्यते''[16] इत्युदाहरणेन कुटुम्बप्राधान्यमपि तासामासीदिति ज्ञायते परं काशिकाकाले भार्याप्रधानगृहं क्षेपे गण्यते स्म– ''भार्यासौश्रुतः, सुश्रुतापत्यस्य भार्याप्रधानतयाक्षेपः''[17] अर्थात् भार्या प्रधानत्वेन गृहे आक्षिप्ता भवति स्म।

**भोज्यपदार्थः–** ओदनयवागू–अपूपसक्तुसूपदुग्धदधिशाकघृतादीनां वर्णनमुभयत्र

प्राप्यते। भाष्यकारेण दधीनां त्रयो भेदाः उल्लिखिताः– ''दधीत्युक्ते बहवोऽर्था गम्यन्ते मन्दमुत्ररकं निलीनकमिति।''[18] काशिकाकारेणापि उत्तमोत्तमदधीनां कृते ''शिलेयं दधि''[19] इति कथितम्। शिला इव। अर्थात् तद् दधि शोभनं भवति यः शिला इव कठिनं भवेत्। शरदि प्रयुज्यमानं दधि ''शारदं दधि''[20] इत्युच्यते। भाष्यकारेण ''दधिभोजनमर्थ-सिद्धेरादिः''[21] इत्युक्तम्। काशिकायां दुग्धपानस्य वर्णनं यथा–''पयःपानं सुखम्।''[22] ''रन्ध्रापकर्षं पयः पिबति''[23], अर्थाद् एतावती शीघ्रता वर्त्तते यत् स्तनच्छिद्रादेव दुग्धं पिबति पात्रमपि नापेक्षते। ब्राह्मणेभ्यः पायसं सुखकरं भवति यथोक्तं– ''ब्राह्मणसुखं पायसम्''[24], कणेहत्य पयः पिबति, ''मनोहत्य पयः पिबति''[25], तावत्पिबति यावदस्याभिलाषो निवृत्तः स्यात्। उदाहरणानि इमानि दुग्धपानस्य औत्सुक्यं तस्य सर्वग्राह्यतां प्रदर्शयन्ति। अपूपः गुडेन तिलेन च मिश्रीकृत्य निर्मीयते तथा च यस्यां पौर्णमास्यां गुडापूपाः तथा च तिलापूपाः निर्मीयन्ते सा पौर्णमासी गुडापूपिका उच्यते। यथोक्तं– ''गुडापूपाः प्रायेणान्नमस्यां पौर्णमास्यां गुडापूपिका। तिलापूपिका पौर्णमासी।[26] भाष्यकारेणापि ''वटकिन्याः पौर्णमास्याः''[27] वर्णनं कृतम्। भोज्यपदार्थगतानि अन्यान्यपि उदाहरणानि सन्ति।

**छात्रजीवनम्–** छात्राणां विद्याध्ययनकालः स्वर्णकालः भवति। तदानीं गुरुच्छात्रयोः मध्ये रक्षकपालकवत् सम्बन्धः भवति स्म। काशिकायां अन्तेवासिनः शिष्याः[28] इति वचनमुपलभ्यते। काशिकाकारेण छात्रशब्दस्य व्युत्पत्तिः एवं प्रदत्ता–''छत्रं शीलमस्य छात्रः। छादनादावरणाच्छत्रम्। गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तश्छत्रशीलः शिष्यश्छात्रः।[29] अर्थाद् छादनात् छात्रः। महाभाष्यकारेण गुरुशिष्ययोः मध्ये परस्परं छत्रमिव सम्बन्धः आसीत् इति वर्णितम्। यथा– ''गुरुश्छत्रम्। गुरुणा शिष्यश्छत्रवच्छाद्यः। शिष्येण च गुरुश्छत्रमिव परिपाल्यः।[30] अर्थात् गुरुशिष्ययोः मध्ये छत्रवत् रक्षकपरिपालकवद् आसीत् सम्बन्धः। परं काशिकाकालपर्यन्तं छात्रशब्दस्य निहितार्थः विपरीतः। काशिकानुसारेण दोषाणाम् आवरणत्वात् छात्रः इति कथ्यते। तदानीं गुरवः तमेव शिष्यं 'छात्र' इति शब्देन आकारयन्ति स्म ये शिष्याः तेषां गुरूणां सेवा, शुश्रूषां च कुर्वन्ति स्म दोषान् छादयन्ति आवरयन्ति स्म। प्रसङ्गेऽस्मिन् महाभाष्यगतच्छात्र-शब्दस्य निहितार्थस्य काशिकायां कालगतच्छात्रशब्दस्य अर्थे विकासः जातः।

काशिकायां काशिकाकारेण छात्राणां स्वभावगतमेकमुदाहरणं प्रदत्तम्– ''छात्रप्रियोऽ-नध्यायः।''[31]

**धार्मिकाचरणानि–** धार्मिकाचरणेषु यज्ञयागादि–व्रतोपवास–धार्मिकोत्सवादीनां वर्णनं वर्तते।



यज्ञेषु दर्शपौर्णमासस्य अग्निहोत्रस्य वर्णनं काशिकायां महाभाष्ये च दृश्यते। यज्ञेषु प्रदीयमानया आहुत्या पाकयज्ञस्य, नामकरणं भवति। यथा– ''यस्मिन् यज्ञे मोदकाः प्रदीयन्ते सः मौदकिको यज्ञः।[32] मोदकाः प्रकृताः अस्मिन् यज्ञे मौदकिको यज्ञः। ''अन्नं प्रकृतमस्मिन् अन्नमयो यज्ञः।''[33] काशिकाकारः सोमपानस्य अधिकारी आर्थिकरूपेण प्रपूर्णः भवेदिति वर्णयति–''यस्य त्रैवार्षिकं धान्यं निहितं भृत्यवृत्तये। अधिकं वापि विद्येत स सोमं पातुमर्हति।''[34]

**पूजापद्धतिः–** पूजापद्धतिषु देवपूजा मूर्त्तिपूजा इत्यादयः प्रचलिताः आसन्। प्रतिकृतिं निर्माय पूजा भवति स्म।

भाष्यकारेण ब्रह्मप्रजापती, शिववैश्रवणौ, स्कन्दविशाखौ[35] द्वन्द्वेषु पूज्यन्ते स्म इति वर्णितम्। मूर्त्तयः जीविकार्थं निर्मायन्ते स्म। परं विक्रयणं न भवति स्म। वासुदेवः शिवः, स्कन्दः विष्णुः[36] इत्यादयः आसन्।

**व्रतोपवासः–** व्रतोपवासादीनां परम्परा भारतीयेतिहासे वर्तते। काशिकाकारः व्रत इति शास्त्रपूर्वकनियम इति वर्णयति– यथा– ''व्रत इति शास्त्रतो नियम उच्यते। वाचंयम आस्ते।''[37] भाष्यकारेण ''पयोव्रतो ब्राह्मणो यवागूव्रतः क्षत्रिय आमिक्षाव्रतो वैश्य''[38] इति वर्णितम्। काशिकाकारः स्थण्डिले शयितुं व्रतमस्य स्थाण्डिलो भिक्षुः।[39] स्थाण्डिलो ब्रह्मचारी। ''अश्राद्धभोजी ब्राह्मणः''[40] एतेषामुल्लेखः कृतः। यः पयपानस्य व्रतं करोति सः ''पयो व्रतयति''[41] उच्यते। ''वृषलान्नं व्रतयति''[42] यः वृषलस्य अन्नं न खादति एवं यः व्रतं करोति सः उच्यते।

एवञ्च महाभाष्योदाहरणेषु काशिकायाः उदाहरणेषु च सामाजिकव्यवहाराः। धर्मव्यवहाराः, सकलाः विद्याः कलाः, स्त्रीणामधिकाराः जीवनपद्धतिः, इत्यादयोऽनेके विषयाः संगृहीताः दृश्यन्ते। तदानींतना जनाः सर्वासु विद्यासु कलासु निपुणाः सामाजिकव्यवहारेषु निष्णाताः धार्मिकाः व्रतचारिणः आसन्निति। अत्र दिङ्मात्र-प्रदर्शितोदाहरणैः इमे सर्वे विषयाः स्पष्टाः प्रतीयन्ते।

निष्कर्षरूपेण वक्तुं शक्यते यत् महाभाष्यगतकाशिकागतोदाहरणानां सम्यगीक्षणेन ज्ञायते यत् महाभाष्यकालीनोदाहरणानां काशिकाकाले कुत्रचित् विकासः, कुत्रचित् स्त्री-सम्मानेषु बुद्धिसंकीर्णता, सामाजिकव्यवहारकरणे कौशल्यं चासीत्।

***

## सन्दर्भाः


1. महाभाष्यम्, 1/1/14
2. काशिका (न्यास), 1/1/14
3. अभिज्ञानशाकुन्तलम्, 4/17
4. काशिका, 1/4/105
5. काशिका, 1/4/105
6. महाभाष्यम्, 2/3/36
7. महाभाष्यम्, 1/3/1
8. महाभाष्यम्, 1/3/55
9. काशिका, 1/3/23
10. महाभाष्यम्, 1/4/3
11. काशिका, 2/3/23
12. काशिका, 3/2/20
13. महाभाष्यम्, 4/1/14
14. काशिका, 4/2/64
15. काशिका, 7/3/27
16. महाभाष्यम्, 1/4/2
17. काशिका, 6/2/69
18. महाभाष्यम्, 2/1/34
19. काशिका, 5/3/102
20. काशिका, 4/3/13
21. महाभाष्यम्, 6/4/161
22. काशिका, 6/2/140
23. काशिका, 3/4/42
24. काशिका, 6/2/16
25. काशिका, 1/4/66
26. काशिका, 6/2/83
27. महाभाष्यम्, 5/2/82
28. काशिका, 4/3/10
29. काशिका, 4/4/62
30. महाभाष्यम्, 4/4/62
31. काशिका, 6/2/16
32. काशिका, 5/4/23
33. काशिका, 5/2/21
34. काशिका, 7/3/16
35. महाभाष्यम्, 8/1/15
36. काशिका, 5/3/99
37. काशिका, 3/2/40
38. महाभाष्यम्, स्पशा.
39. काशिका, 3/2/80
40. काशिका, 3/2/80
41. काशिका, 3/1/21
42. काशिका, 3/1/21


***



## किञ्चिद् रामायणीयम्

वाल्मीकिरामायणे वृत्तवर्णनव्याजेन जनानां स्थानानां वस्त्वित्यादीनां वा विविधानि स्वरूपाण्युपन्यस्तानि सन्ति। तानि व्यष्टिशः सन्दर्भस्थलोल्लेखपुरःसरमत्र संगृह्य 'यथास्ति तथा' रीत्या (समीक्षानुवादादि विना) प्रस्तूयते।

**अयोध्या कीदृशी आसीत्?**

1. लोकविश्रुता नगरा
2. मानवेन्द्रेण मनुना स्वयं निर्मिता
3. द्वादशयोजनायता महापुरी
4. सुविभक्तमहापथा विस्तीर्णा श्रीमती
5. सुविभक्तेन महता राजमार्गेण शोभिता
6. नित्यशः जलसिक्तेन अवकीर्णेन मुक्तपुष्पा
7. कपाटतोरणवती
8. सुविभक्तान्तरापणा
9. सर्वयन्त्रायुधवती
10. सर्वशिल्पिभिः उषिता
11. सूतमागधसंबाधा
12. अतुलप्रभा
13. उच्चाट्टालध्वजवती
14. शतघ्नीशतसंकुला
15. दुर्गगम्भीरपरिखा
16. वधूनाटकसंघैश्च संयुक्ता
17. उद्यानाम्रवनोपेता महती
18. सालमेखला
19. अन्यैः दुरासदा दुर्गा
20. वाजिवारणसम्पूर्णा
21. गोभिः उष्ट्रैः खरैः च पूर्णा
22. सामन्तराजसंघैः कलिकर्मभिश्च आवृता
23. नानादेशनिवासैः वणिग्भिः उपशोभिता
24. पर्वतैरिव रत्नविकृतैः प्रासादैः शोभिता
25. इन्द्रस्य अमरावतीव कूटागारैश्च सम्पूर्णा
26. अष्टापदाकारा वरनारीगणायुता चित्रा
27. सर्वरत्नसमाकीर्णा विमानगृहशोभिता
28. गृहगाढा अनिच्छिद्रा
29. समभूमौ निवेशिता
30. शालितण्डुलसम्पूर्णा इक्षुकाण्डरसोदका
31. दुन्दुभीभिः मृदङ्गैः वीणाभिः पणवैश्च नादिता
32. सुनिवेशितवेश्मान्ता नरोत्तमसमावृता

(वा.रा.बाल./5)